केवलं तदा एव व्यक्तिनिष्ठमतानां प्राबल्यं न्यूनं भवति। अस्य महतः कार्यस्य मूलाधाररूपेण विद्वत्सु बादरायणब्रह्मसूत्राणां द्वारा उपनिषदां स्पष्टं ज्ञानं भवेत्। एतेन, ब्राह्मणानां स्वेषां योग्यतानुसारम् उपासना, श्रौतस्मार्तकर्मानुष्ठानं च कर्तुं मार्गः भवति। एतेषां तपसः प्रभावेण सामान्यजनाः धर्मनिरताः भवन्ति। 'यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः।' चतुर्वर्णानाम् अपि समानवेदिकायां पुराणश्रवणं, देवमन्दिराणाम् उत्सवेषु भागग्रहणं, यात्राणां समाचरणं, पर्वकालेषु नदीषु समुद्रेषु च स्नानकरणम् इत्यादीनि सम्भवन्ति चेत्, सर्वेषां मनसि वयम् एकस्य परिवारस्य सदस्याः इति भावः उत्पद्यते। अनया दृष्ट्या देवमन्दिरेषु – तत्रापि विशेषतया यात्रास्थलेषु सङ्घटनं भवेत्। अन्ततो गत्वा, परमेश्वरे भक्तिः, वेदोक्ताचरणानि च सर्वेषु वर्णेषु स्थापितानि भवेयुः। भवान् इदं महत्कार्यं निर्वहतु। एतदर्थमेव भवान् अवतीर्णः। अतः प्रस्थान-त्रयस्य[1] भाष्याणि रचयतु। विद्वद्भिः सह भाषणं करोतु। भाषणे समाप्ते सति वयं वादे पराजिताः इति भावः कस्यापि न भवेत्; अपि तु सम्यग्ज्ञानं प्राप्तमिति धन्यताभावः भवेत्। तेषां हृदयानि जयतु। अविरतं सञ्चरतु। मार्गशीर्षमासे आरब्धे सत्येव इतः प्रस्थानं करोतु। अधुना सिन्धुदेशे प्रवासकरणं दोषाय। तत्र मा गच्छतु। सौराष्ट्रे सञ्चर्य, ततः एव सिन्धुदेशस्य परिस्थितिम् अवगच्छतु। अनन्तरं काशीं गच्छतु। इदं कार्यं निर्वोढुम् अपेक्षितम् आयुः, स्वास्थ्यं च भवान् प्राप्नोतु' इत्यवदन् गुरवः।

शङ्करः 'भगवन्, भवताम् आशीर्वादेन एव अहम् एतत् कार्यं साधयितुं समर्थः भवेयम्। माम् आशीर्भिः अनुगृह्णन्तु' इति नमस्कारमकरोत्।

## ३. सोमनाथं प्रति

परेद्यवि गुरवः शङ्करः सोमनाथं प्रति प्रस्थितः इति वार्तां यात्रार्थिनां द्वारा सौराष्ट्रभक्तेभ्यः सूचितवन्तः। मार्गशीर्षशुक्लतृतीयायां भिक्षानन्तरं शङ्करस्य प्रस्थानम् इति निश्चयः अभवत्। केषुचिदेव निमेषेषु ओङ्कारेश्वरस्य जनाः सर्वे वार्ताम् इमां ज्ञातवन्तः। सब्रह्मचारिणां तु असह्या मूकवेदना। तस्मिन् दिने देवालयस्य पक्षतः सौप्रस्थानिकस्य, तदनन्तरम् ओङ्कारेश्वरस्य सर्वेषां साधूनां तपस्विनां च कृते भूरिभोजनस्य व्यवस्था अभवत्। सभायां देवालयस्य अध्यक्षः अवदत्- 'परमपूज्यैः

१. उपनिषदः ब्रह्मसूत्राणि भगवद्गीता च प्रस्थानत्रयम्।



गोविन्दभगवत्पादैः वार्धक्ये वस्तुम् अस्माकं ग्रामः चितः इति इदम् अस्मद्भाग्यमेव। एतेषां नैके शिष्याः परमप्रियं धर्माभ्युत्थानकार्यं कुर्वन्तः परिव्राजकरूपेण सञ्चरन्तः सन्ति। तेषु कलशप्रायः, आबालवृद्धप्रियश्च अस्माकं शङ्करवर्यः तत्कार्यार्थमेव अस्मान् परित्यज्य गच्छन् अस्ति। एतावत्पर्यन्तम् ओङ्कारेश्वरस्य प्रत्येकं जनस्य हृदयसम्राट् शङ्करवर्यः अग्रिमेषु दिनेषु भरतखण्डस्य प्रत्येकं जनस्य हृदयसम्राट् अवश्यं भवत्येव।' मध्ये कोऽपि उच्चस्वरेण 'अस्माकं शङ्करभगवत्पादानाम्' इति घोषणं कृतवान्। जनाः स्वच्छन्दतया 'जयोऽस्तु, जयोऽस्तु' इति उच्चैः अवदन्। अध्यक्षः पुनः अनुवर्तनं कुर्वन् 'अस्माकं शङ्करवर्याय परमेश्वरः दीर्घायुष्यं स्वास्थ्यं च दद्यात् इति प्रार्थये। अहम्, अहम्., अहम्' इति किमपि वक्तुम् उद्युक्तः वक्तुम् अपारयन् हिक्कासहितं रोदनम् अकरोत्। सभायां सर्वेषां अश्रुप्रवाहः एव।

शङ्करः उत्थाय अवदत् : 'परमप्रियाः बन्धवः, अधुना एकं स्तोत्रं पाठयामि, वदन्तु। गोविन्दं परमानन्दम्।'[1] सर्वे भावपूर्णतया गीतवन्तः। अनन्तरम् अनुवर्त्य 'कीदृशेन महापुण्येन वा नाहं जाने, अहम् ओङ्कारेश्वरम् आगतवान्। परमपूज्याः, ब्रह्मविद्वद्वरिष्ठाः, वात्सल्यपूर्णाश्च गुरवः मया अत्र प्राप्ताः। मम जीवनं पावनम् अभवत्। भवन्तः सर्वे वर्षत्रयं यावत् मां परमप्रीत्या दृष्टवन्तः। अहं भवताम् अधमर्णः। भवत्सु एकैकोऽपि निर्बाधं सुखं, शान्तिं च प्राप्नोतु इति ओङ्कारेश्वरं प्रार्थये। मया इतः निर्गन्तव्यमस्ति। कृपया अनुमतिं प्रयच्छन्तु' इत्युक्त्वा उपाविशत्। अनन्तरं भोजनमभवत्। शङ्करः प्रस्थातुं सज्जः भूत्वा गुरून् नमस्कृतवान्। गुरवः तस्य शिरः मृदुतया मर्दयन्तः 'शङ्कर, गच्छतु पुनर्दर्शनाय' इत्यवदन्। शङ्करः यदा दण्डं कमण्डलुं च गृहीत्वा प्रस्थितः, तदा जनानां विरहवेदना प्रोद्विन्ना। तं परित्यक्तुम् असहमानाः तस्य पृष्ठतः एव गतवन्तः। शङ्करः चलति स्म। जनाः धावन्ति स्म। अथापि ते तं प्राप्तुं न शक्ताः। यस्य कस्यापि वा तावदेव शक्यम्। यतो हि तेन गतायां दिशि गन्तुं शक्यं, तस्य प्राप्तिः कष्टसाध्या।

प्रायः वर्षत्रयात्पूर्वं गृहं त्यक्त्वा एकाकी एव कालटीतः प्रस्थितः शङ्करः, अधुना पुनः एकाकी एव ओङ्कारेश्वरात् प्रस्थितवान्। भेदस्तु एतावानेव; तदा अष्टवर्षीयः बालकः कुत्र गमनमिति अज्ञात्वा प्रस्थितः; अधुना द्वादशवर्षदेशीयः बालकः, शतशः जनैः एतदर्थं प्रतीक्षमाणं सोमनाथं प्रति प्रस्थितः। कुत्रापि प्रतीक्षाम् अकृत्वा अनवरतप्रयाणेन सप्ताहद्वयेन नवश्रीपत्तनं प्राप्तवान्। शङ्करस्य आगमनार्थं सोमनाथस्य सज्जनाः तत्र प्रतीक्षन्ते स्म। पद्भ्यामेव गम्यते चेत् बहुदूरं भवतीति,

१. परिशिष्टम् १ दृश्यताम्

नौकया सिन्धुसमुद्रेण गम्यते चेत् समीपमिति च उक्त्वा ते स्वैः सह तं नौकया नीतवन्तः। सोमनाथप्राप्तिसमये अपराह्णः। शङ्करः स्नात्वा सोमनाथेश्वरस्य दर्शनम् अकरोत्। अनन्तरं भिक्षा अभवत्। सायङ्काले चतुर्वादने सभा सम्मिलिता। मन्दिरस्य अध्यक्षः एव सभाध्यक्षः। 'प्रयाणे महती श्रान्तिः जाता स्यात् खलु?' इति सः अपृच्छत्।

'न किमपि, सुखप्रदमेव आसीत्।'

'अस्माकं गुरवः स्वस्थाः सन्ति किम्?'

'परिणतं वयः तेषाम्। तथापि स्वस्थास्तु सन्ति।'

अनन्तरम् अध्यक्षः सभाम् उद्दिश्य 'अस्माकं गुरून् परमपूज्यान् गोविन्दभगवत्पादान् स्मृत्वा वचनद्वयं वदामि। अस्माकं पुरस्तात् विद्यमानानां बालगुरूणां नाम शङ्कर-भगवत्पादाः इति, एते अस्माकं गुरूणां शिष्याः। वर्षत्रयं तेषां निकटे शास्त्राध्ययनं कृत्वा तेषां सकाशादेव संन्यासदीक्षामपि स्वीकृतवन्तः। गुरूणाम् आज्ञानुसारम् अत्र समागताः सन्ति। एतेषां कार्याणां कृते अस्माभिः सम्पूर्णसहकारः दातव्यः इति, अहं यदा दर्शनार्थं गतवान् आसम्, तदा गुरवः मां साक्षादेव उक्तवन्तः आसन्। इतोऽप्यधिकं भाग्यम् अस्माकं किं वा स्यात्! अतः अस्माभिः किं करणीयमिति वयं सूचनीयाः इति बालगुरून् प्रार्थये' इत्युक्त्वा उपाविशत्।

शङ्करः 'भवितव्यं किमिति अनन्तरं निश्चितं भवतु। अधुना भवतां परिचयं प्राप्तुम् इच्छामि। अपि च सिन्धुदेशे वैदेशिकाः आक्रमणं कृत्वा अस्माकं जनानाम् उपरि दौर्जन्यम् आचरन्ति इति गुरवः वदन्ति स्म। भवतां सकाशात् विवरणानि प्राप्तुं कुतूहली अस्मि' इत्यवदत्।

अध्यक्षः 'तर्हि, अत्र विद्यमानेषु ऊर्जस्तम्भवर्यः, यज्ञेश्वरदीक्षितः, देवशर्मा च तत् वक्तुं प्रभवन्ति। ते सर्वे सिन्धुदेशस्थाः एव। तत्र शत्रूणां दौर्जन्यम् असहमानाः सप्ताष्टदशकेभ्यः पूर्वं निराश्रिताः सन्तः अत्रागताः। ते एव वदन्तु' इत्यवदत्।

ऊर्जस्तम्भवर्यः वक्तुम् आरभत : 'मम तु तदा दशमं वर्षम्। महम्मदबिनकासीम-नामकः अरब्बः अस्माकं देशम् आक्रान्तवान्। तस्य सैन्ये ५०,००० सैनिकाः आसन्'[1] इति तस्मिन् वदति सत्येव यज्ञेश्वरदीक्षितः मध्ये प्रविश्य स्ववचनम् आरब्धवान्।

'ऊर्जस्तम्भवर्य! आरम्भतः किं जातम् इति उच्यते चेत् गुरूणां विचारः इतोऽपि स्पष्टः भवति। गुरुवर्याः ! शृण्वन्तु, कासीमः प्रथमः आक्रमणकारः न।

1. Lane people: Medieval India.p. 7-8



ततोऽपि ५०वर्षेभ्यः पूर्वम् अरब्बाः तदा तदा आगत्य सम्पदम् अपहृत्य गच्छन्ति स्म।[1] सामान्याः चोराः इति मत्वा अस्माकं राजानः तान् गम्भीरतया न परिगणितवन्तः। एकदा ते ससैन्यम् आगत्य आक्रमणम् अकुर्वन्।[2] तदा वयं जितवन्तः। अनन्तरम् उस्माननामकः सिन्धुदेशम् आक्रान्तवान्। तदा राजा चाचा तं पराजित्य, तस्य सेनापतिमेव मारितवान्।[3] अनन्तरं स्वल्पकालं यावत् शान्तिः आसीत्। तथापि दूरस्थान् ग्रामान् आक्रम्य भाययित्वा ग्रामस्य मुग्धजनान् स्वमतं प्रति परिवर्तितवन्तः। अनन्तरम् आगतः कासीमः।'

शङ्करः 'ऊर्जस्तम्भवर्य ! भवतः कथनम् अनुवर्तयतु' इत्यवदत्।

सः वक्तुम् आरभत : 'कासीमः ५०,०००सैन्येन सह सिन्धुप्रान्तम् आक्रान्तवान् खलु, तदा दाहिरः अस्माकं राजा। सः ब्राह्मणः। तदा बौद्धानां सङ्ख्या न्यूना एव आसीत्। कासीमः महानौकास्थानकं देवलं प्रति यदा आगतवान् तदा ते बौद्धाः तं स्वागतीकृत्य अवदन् 'वयं बौद्धाः, वैदिकाः न। वयं भवतः शत्रवः न। अस्मान् मा हिनस्तु' इति।[4] तदा सः अवदत् : 'भवद्भ्यः अभयं प्रदास्यामि। किन्तु मम साहाय्यमाचरणीयम्।'[5] बौद्धाः तत् अङ्गीकृत्य सर्वविधैः तस्य साहाय्यम् अकुर्वन्। दुर्गमान् मार्गान् दर्शितवन्तः, शत्रुभ्यः आहारं दत्तवन्तः, गूढचाररहस्यानि च उक्तवन्तः। एवं तेषां द्रोहस्य मध्ये अपि ब्रह्मनगरे दाहिरः साक्षात् कासीमेन सह युद्धम् अकरोत्।[6] सः यवनान् दास्यसैनिकरूपेण नियुक्तवान् आसीत्। यवने कासीमे पुरतः आगते सति ते तस्य पक्षं गत्वा दाहिरस्य विरुद्धरूपेण एव युद्धम् अकुर्वन्। राजा दाहिरः महता पराक्रमेण संयुध्य मरणमाप्नोत्। यवनाः पत्तनं प्राविशन्। तदा राज्ञी, प्रासादस्य अन्याः स्त्रियः च अग्निप्रवेशम् अकुर्वन्।[7] तदा सूर्यदेवी, प्रमीलादेवी इति च तस्य द्वे पुत्र्यौ सैनिकैः गृहीते।[8] सैनिकाः अन्यान् जनान् मारितवन्तः। नैकाः स्त्रियः स्वीकृत्य गताः। तेषां भोगार्थं नियोजितवन्तः।[9] सिन्धुदेशस्य बहून् ग्रामान्

1.Tuhfatu kiram & al-Baladhuri / Trans. By F.C. Murgotten – p. 432
2. Armed Aggression : Lane poole : Medival India - p. 5
3. Majumdar : Arab Invasion of India – p. 29
4. Tod : Annals of Rajaputana I p. 75
5. Majumdar : Arab Invasion of India – p. 26, 34
6. Chachnama : Elliot, History of India I. p. 161
7. Chachnama : History of India I. p. 170
8. Chachnama : History of India I. p. 171
9. Briggs : Firishta IV p. 410-411; Muir : Chaliphate p.362-363
10. K.M.Munshi:Imperial Gurjaras in Glory that was GujarathDesh III p. 50

MahaParivrajaka

भस्मीकृतवन्तः।'[10]

यज्ञेश्वरवर्यः झटिति मध्ये प्रविश्य अवदत् : 'गुरुवर्याः ! दास्ये विद्यमानाः यवनसैनिकास्तु धर्माज्ञानिनः, परकीयाः। तैः द्रोहकरणं युज्यते। तेषु विश्वासं कृत्वा सैन्यं प्रति गमनम् अस्मदीयानां दोषः। अस्मदीयैः एव एतैः बौद्धैः शत्रुभ्यः साहाय्यकरणं किं साधु? वयं तेषां मताचरणानां कृते न किमपि विघ्नम् उत्पादितवन्तः खलु!'

शङ्करः अवदत् : 'यज्ञेश्वरवर्य! इयं चर्चा अनन्तरं भवतु, मम एकं संशयं परिहरतु। बौद्धाः तदा व्यापकतया प्रवृद्धाः आसन्। इदानीं ते तावन्तः न सन्ति। तेषां सङ्ख्यायाः न्यूनतायां किं कारणम्?'

देवशर्मवर्यः स्वाभिप्रायं प्राकटयत् : 'मम ज्ञानानुसारम् अस्माकं पूर्वजैः कथ्यमानम् आदिमं कारणम् इदम् : बौद्धाः बहुपुरातनकालादपि स्वदेशद्रोहिणः। तेषां देशप्रेम एतावत्पर्यन्तं न कोऽपि श्रुतवान्। सहस्रशः वर्षेभ्यः प्राक् आक्रमणं कृतवतां ग्रीकाणां ते साहाय्यम् आचरितवन्तः।[1] तेषाम्, अस्माकं देशः, अस्माकं जातिः, अस्माकं राष्ट्रम् इति अभिमानः कदापि नासीत्। 'प्रपञ्चः सर्वः एकः एव। वयं विश्वमानवाः' इत्यादिभिः जल्पवचोभिः अस्माकं समाजं वञ्चितवन्तः। इमां परिस्थितिम् अवगत्य ग्रीकः मेनाण्डरः एकां वार्तां प्रसारितवान् : वैदिकहिन्दवः दुर्बलेभ्यः बौद्धराजेभ्यः अधिकारं बलात् प्राप्तुं व्यूहं रचयन्तः सन्ति। अतः मम युद्धं तु तैः सह।' एतेन तस्य कृते बौद्धानां सहकारः दृढः अभवत्। दुर्बलः बौद्धराजः बृहद्रथः तेन सह युद्धमेव नाकरोत्। मेनाण्डरः अयोध्यां यावत् देशम् आक्रान्तवान्। तदा पुष्यमित्रनामा ब्राह्मणः बृहद्रथस्य सेनापतिः आसीत्।[2] सः विचक्षणतया सैन्यं स्वाधीनं कृत्वा ग्रीकान् पराजितवान्। अनन्तरं केवलं देशद्रोहिणः बौद्धान् शूलमारोपितवान्। सामान्यबौद्धेभ्यः स्वधर्मानुसारं जीवितुम् आनुकूल्यं कल्पितवान्। अनन्तरं पतञ्जलेः नेतृत्वेन अश्वमेधयागं कारितवान्। कालान्तरे, पराजित्य पलायिताः ग्रीकाः शरणमागत्य आश्रयम् अयाचन्, आश्रयः प्राप्तः। क्रमशः ते अस्माकं समाजे मिश्रिताः।[3] बौद्धाः

1. W.W. Tam : Greeks in Bactria & India – p. 175; Nehru : Discovery of India – p. 43; Smith : Early History of India.
2. W.W. Tam : Greeks in Bactria & India (1938); Sir John Marshall : Taxila (1951) p. 33
3. Smith : Early History of India (1924) p. 213-214; Nehru : Discovery of India (1956) p. 140
4. Majumdar, Roy Chaudhary, Kalikumara Dutta : Advanced History of India.



Mahaparivrajaka

आक्रमणकारेभ्यः कुशानेभ्यः अपि साहाय्यम् आचरितवन्तः।[4] अनन्तरं यवनेभ्यः, ब्याक्ट्रियनेभ्यः, शकेभ्यः, हूणेभ्यः, अधुना अरब्बेभ्यश्च ते साहाय्यम् आचरन्तः एव सन्ति। तेभ्यः अप्राप्तसाहाय्याः शत्रवः एव न सन्ति। गच्छता कालेन तेषां द्रोहेण खिन्नाः जनाः राजानः च तान् दूरे स्थापितवन्तः। बौद्धेभ्यः लाभं प्राप्य देशस्य आक्रमणानन्तरं हूणाः, यवनाश्च तान् एव शाकानि इव कर्तयित्वा मारितवन्तः। तेषु नैके टिबेट्देशं प्रति पलायितवन्तः। अपि च मरणात् भीताः इतरे बौद्धाः इस्लाममतं प्रति परिवृत्ताः।[1] बौद्धानां सङ्ख्यान्यूनतायाम् इदं प्रधानं कारणम्।'

यज्ञेश्वरवर्यः : 'बौद्धानां सङ्ख्यायां न्यूनता इत्युक्ते अस्माकं सङ्ख्यायाः एव न्यूनता अभवत्, इतिवदेव खलु?'

देवशर्मा : 'तत् कथम्?'

'बौद्धाः अस्मदीयाः एव, अविवेकेन बौद्धाः अभवन्। मारणेन, इस्लाममतं प्रति परिवर्तनेन वा तेषां सङ्ख्यायां न्यूनता भवति चेत् मम तु सन्तोषः न भवति। ते अविवेकं परित्यज्य वैदिकधर्मं प्रत्यागच्छन्ति चेदेव मम सन्तोषः।'

शङ्करः : 'तत् सत्यम्। तेषां सङ्ख्यान्यूनतायाम् अन्यानि कारणानि कानि?'

'बौद्धानाम् अहिंसाकल्पनायाः अतिरेकः अस्य अपरं कारणम्। अधुना सप्ताष्ट-शताब्दीभ्यः पूर्वमपि अशोकेन प्रेरितः बौद्धराजः हर्षः मांसविक्रयणं निषिद्धवान्। गुप्तरूपेण विक्रीतवतः शूलमारोपितवान्।[2] इदं दृष्ट्वा जनाः विद्रोहं कृतवन्तः। तदा बौद्धाः राजानः तेषां सस्याहारार्थं धनं दत्तवन्तः। अधिकाः जनाः मांसाहारिणः खलु! वर्षत्रयानन्तरं ते किं वा कुर्युः! खिन्नाः सन्तः ते सर्वे वैदिकधर्मं प्रत्यागताः।'[3]

मध्ये यज्ञेश्वरवर्यः : 'गुरुवर्याः! मांसाहारेण हिंसा भवति चेत्, मांसाहारिणः शूलारोपणम् अहिंसा वा? राजानः सन्तः अपि एवं प्रकारेण मूर्खाः सन्तीत्ययं कलियुगस्य महिमा खलु!'

देवशर्मा अनुवर्तितवान् : 'बौद्धानां सङ्ख्यायाः न्यूनीभवने इतोऽप्येकं कारणं वदामि, शृण्वन्तु। मांसाहारिणः सर्वे ग्रामात् बहिः पृथक्तया वसेयुः इति राजाज्ञा अभवत्। तैः ग्रामस्य अन्तः आगन्तव्यं चेत् घण्टां पटहं वा वादयद्भिः आगन्तव्यम्

1. Nehru : Discovery of India – p. 184
2. Smith : Early History of India - p. 194-195
3. Nehru : Discovery of India – p. 184
4. Majumdar, Roy Chaudhary, Kalikumara Dutta : Advanced History of India – p. 186

आसीत्।[4] एतानि अस्पृश्यतायाः अवमाननानि असहमानाः ते सर्वे वैदिकधर्मं प्रत्यागताः। एवमपि तेषां सङ्ख्या न्यूना अभवत्।'

शङ्करः अपृच्छत् : 'इतोऽपि वक्तुं किमपि अवशिष्टं वा?'

'गुरुवर्याः! अस्माकं पूर्वजैः अनुभूतं कष्टं वदन्तः भवामः चेत् तस्य अन्त्यमेव नास्ति। वक्तव्यस्य तात्पर्यम् एतावदेव।'

शङ्करः 'ऊर्जस्तम्भः, यज्ञेश्वरदीक्षितः, देवशर्मा च बहून् विचारान् प्रोक्तवन्तः। सर्वेऽपि गभीराः विचाराः। 'अधुना सन्ध्याकालः। भवद्भिः स्वीयानुष्ठानार्थं गन्तव्यम्। अध्यक्षवर्य! वयं पुनः श्वः चतुर्वादने एवमेव मिलाम किम्?' इति अपृच्छत्। 'अवश्यम्' इत्यवदत् अध्यक्षः। सभा परिसमाप्ता।

परेद्यवि यज्ञेश्वरदीक्षितः शङ्करं भिक्षार्थं स्वगृहं नीतवान्। भिक्षानन्तरं सर्वेषां नमस्करणानन्तरम् अन्ते वर्षीयेण स्वपौत्रेण नमस्कारं कारयित्वा अवदत् 'गुरुवर्याः! अयं महाचटुलः। अयं जागर्ति चेत् अन्ये केऽपि निद्रां कर्तुं न शक्नुवन्ति, तावती चेष्टा। किन्तु, अद्य कामपि चेष्टाम् अकृत्वा भवतः एव पश्यन् उपविष्टः अस्ति।'

'अस्य नाम किम्?'

'देवलः' इत्युक्त्वा दीक्षितः अनुवर्तितवान्– 'वयम्, अस्मत्पूर्वजाश्च निष्प्रयोजकाः। किमपि स्वल्पं वेदाध्ययनं कृत्वा पौरोहित्येन जीवितवन्तः। यवनानाम् उपद्रवेण सर्वदापि एकस्मात् ग्रामात् अन्यं ग्रामं प्रति धावनेन एव जीवनम् अतीतम्। न किमपि साधितम्। देवलः तथा न भवेत्। उत्तमेन विदुषा सता तेन लोकस्य प्रयोजनं भवतु इति तम् आशीर्भिः अनुगृह्णन्तु।'

शङ्करः तस्य शिरसि करं निधाय 'देवल! भवान् जागर्ति चेत् न कोऽपि निद्रां कर्तुं शक्नोति इति वदति भवतः पितामहः। प्रौढे वयसि भवान् निद्रामग्नानां जागरयिता भवतु। नीरोगी दीर्घायुष्मान् च भवतु' इति आशीर्वादम् अकरोत्।

परेद्यवि सायङ्कालीना सभा। शङ्करः वचनम् आरभत – 'भवद्भिः ह्यः उक्तस्य तात्पर्यम् इदम् : शत्रवः देशम् आक्रान्तवन्तः। स्वदेशरक्षणार्थं कृतेषु युद्धेषु अस्मदीयाः पराजिताः। अनन्तरं शत्रुभिः जनानां वधः कृतः; ये जीवताः तैः मतान्तरस्वीकारः कारितः। अस्य क्षोभस्य मूलं कारणं किम्? अस्मदीयैः एव बौद्धैः कृतः समाजद्रोहः। किमर्थं द्रोहम् अकुर्वन्? सनातनधर्मस्य विचारे द्वेषः आसीत्। स्वेषां मतानुचरणार्थं सनातनधर्मानुयायिभिः न कोऽपि विघ्नः कृतः चेदपि द्वेषः किमर्थम् आगतः? अस्य विचारे चिन्तनं करणीयम्। सनातनधर्मे एव साङ्ख्याः, योगिनः, वैशेषिकाः, तार्किकाः,



भागवताः इत्येवं विभिन्नाभिप्रायवन्तः सन्ति। तथापि परस्परं द्वेषः नास्ति। केवलं बौद्धानां द्वेषः किमर्थम्? विभिन्नाभिप्रायवन्तः साङ्ख्यादयः वेदस्य परिधिं न त्यक्तवन्तः। बौद्धाः त्यक्तवन्तः। वर्णाश्रमधर्मान् यज्ञान् च ते नाङ्गीकुर्वन्ति। नाङ्गीकुर्वन्ति चेदपि चिन्ता नास्ति। किन्तु तद्विचारे तेषां द्वेषः एव अस्ति। अयं निष्कारणद्वेषः किमर्थम्? भवन्तः केऽपि कारणं वक्तुं प्रभवन्ति वा?' द्वित्रनिमेषात्मकं मौनम्। कारणं किमिति न केनापि ज्ञायते। शङ्करः एव अनुवर्त्य अवदत्–

'अस्माकं सर्वेषां गुरुभिः परमपूज्यैः गोविन्दभगवत्पादैः उक्तमेव वदामि, शृण्वन्तु। बौद्धधर्मः व्यक्तिनिष्ठः। सनातनधर्मः इव अपौरुषेयः न। एकः जनः कियता प्रमाणेन बुद्धिमान् चेदपि, तस्य बुद्धिः सीमिता एव भवति। तस्मिन् समग्रदृष्टिसामर्थ्यं न भवति। अतः तस्य सिद्धान्ते परिपूर्णता न भवति। इदं तेनैव न ज्ञायते इत्यस्मात् तस्य अनुयायिनः कथं जानीयुः! किन्तु स्वेषां गुरुणा प्रोक्तमेव श्रेष्ठमिति मिथ्यामोहः, अन्यैः उक्तं तद्विरुद्धम् इति क्रोधः च इतरेषां विचारे द्वेषस्य मार्गः भवति। अतः तेषाम् आचरणं दुष्टं भवति। व्यक्तिनिष्ठानि सर्वाण्यपि मतानि एवमेव। तेषु सिद्धान्तेषु दोषाः अवश्यमेव भवन्तीत्यतः गच्छता कालेन तेषां नाशः अपि निश्चितः एव। किन्तु यावत्पर्यन्तं ते जीवन्ति, तावत्पर्यन्तं तेषाम् अनुयायिनः समाजे क्षोभम् उत्पाद्य, स्वेषां द्वेषयुतजीवितेन पापावलिप्ताः भवन्ति' इति समापितवान्। बहुसमयं यावत् सभायां मौनम् आवृतम् आसीत्। अनन्तरं यज्ञेश्वरवर्यः अपृच्छत् : 'गुरुवर्याः! प्रकृतं सर्वेषां श्रेयोनिमित्तम् अस्माभिः किं करणीयम् इति वदन्तु।'

'भवत्प्रश्ने 'अस्माभिः' इत्यत्र ब्राह्मणाः, क्षत्रियराजाः च अन्तर्गताः। उभयोरपि स्वीयमेव कार्यमस्ति। अधुना ब्राह्मणस्य कर्तव्यं किम् इति पश्यन्तु। सनातनधर्मस्य दृढीकरणम् उभयोरपि सार्वकालिकं कर्तव्यम्। इदं केवलम् अध्यापनेन साध्यम्। अध्यापनार्थम् अध्ययनम् आवश्यकम्। अध्ययनाध्यापने एव लोकशान्त्याः आधारः। अतः स्वाध्यायप्रवचनानि ब्राह्मणस्य तद्धि तपस्तद्धि तपः। इदम् अध्यापनं सर्ववर्णानां कृते अपि भवेत्। आचरणीयः धर्मः भिन्नधर्मानुयायिनां धर्मः भिद्यते। अतः अध्ययनाध्यापनयोः परिधिः गभीरा विस्तृता च। धर्मस्य गभीरता श्रुतौ अस्ति, तस्य विस्तृतिः स्मृतौ अस्ति। श्रुतौ स्थिरता अस्ति; स्मृतौ चलनशीलता अस्ति; यतो हि स्मृतिः कालानुगुणम् आचरणं नियमयति। स्मृतिनियमान् ये केऽपि कर्तुं न प्रभवन्ति। श्रुत्यध्ययनसम्पन्नाः, प्राज्ञाः, शान्ताः, दान्ताः, धर्मकामाश्च केवलं कर्तुं प्रभवन्ति। इतःपरं राजधर्मे अवधेयं किमिति पश्यन्तु। एकया दृष्ट्या ब्राह्मणधर्मः

सरलः, राजधर्मः जटिलः। शाश्वतधर्मस्य मूलम् अत्यक्त्वा तत्तत्कालानुगुणं योग्यायाः कुटिलनीतेः अनुसरणं राज्ञः अधर्मः न; यतो हि शाश्वतधर्मस्य रक्षणार्थं सा आवश्यकी। महाभारतयुद्धे आद्यन्तं भगवान् कृष्णः राजभ्यः इमां शिक्षितवान्। किन्तु ते न शिक्षिताः। बहुवारम् अस्मदीयाः राजानः ब्राह्मणाः इव शत्रुभिः सह अपि सरलतया व्यवहरन्ति। अयं स्वेषां धर्मस्य च हानिकारकः अविवेकः। राजानः अविवेकिनः न भवेयुः। एतत्सर्वं राजभ्यः बोधयित्वा, काले काले योग्यं मार्गदर्शनं ब्राह्मणस्य कर्तव्यम्। अनया दृष्ट्या भवद्भिः सर्वैः जागरूकैः भाव्यम्। इतःपरं स्पष्टतया कान् क्रमान् अनुसृत्य अग्रे गन्तव्यम् इति क्रमशः निश्चितं भवतु। अस्माकं प्रयत्ने गुरूणां मार्गदर्शनम् अनुग्रहश्च अस्ति। अतः अस्माकं का वा चिन्ता!'

## ४. काशीं प्रति

द्वित्राणां दिनानाम् अनन्तरं शङ्करः सोमनाथात् निर्गन्तुं निश्चयमकरोत्। 'पुनः आगमिष्यामि' इति उक्त्वा स्वस्य आराध्यदेवस्य श्रीकृष्णस्य दर्शनार्थं द्वारकां प्रति प्रस्थितवान्। तत्र दर्शनानन्तरं मन्दिरे एव स्थित्वा केषाञ्चन मुख्यानां परिचयं सम्पादितवान्। तत्रापि बहवः गोविन्दभगवत्पादानां शिष्याः आसन्। त्रिचतुरदिनानि यावत् तैः सह बहूनां विचाराणां विषये विमर्शः प्रवृत्तः। किन्तु शास्त्राध्ययनं कृतवन्तः विद्वांसः केऽपि तत्र न आसान्। अतः एव गुरवः सोमनाथात् साक्षात् काशीं प्रति गन्तुं सूचितवन्तः इति चिन्तने मनसि आगते शङ्करः कुत्रापि अवरोधं विना काशीं प्रति प्रस्थितः। मार्गे अधिकतया पादचारणमेव। कदाचित् यात्रार्थिनाम् अश्वशकटस्य वृषभशकटस्य वा साहाय्यम्। यथाशीघ्रं काशीप्राप्तेः सङ्कल्पः। प्रायः एकस्मिन् मासे अयं सङ्कल्पः पूर्णतां गतः।

प्राप्त्यनुक्षणं गङ्गास्नानम्। अनन्तरं विश्वनाथस्य दर्शनम्। दण्डकमण्डलुधारिणम् अमुं तेजस्विनं बालसंन्यासिनं दृष्टवन्तः, याचनात् पूर्वमेव स्वयमेव भिक्षां प्रयच्छन्ति स्म। कुत्र वस्तुं शक्यम् इति यात्रार्थिनः पृष्ट्वा, तैः दर्शितां समीपवर्तिनीं धर्मशालां प्राप्नोत्। तत्र तत्र पाठशालाः, एकत्र एकं बृहद् पुस्तकालयं च दृष्ट्वा अनुक्षणम् अविरतम् अध्ययनम्, विद्वद्भिः सह चर्चां च आरभत। शङ्करस्य प्रतिभा केषुचिदेव दिनेषु जनैः अवगता। अनन्तरम् अयं केवलं पुस्तकालयं प्रति एव गच्छति स्म;



काश्याः महान्तः विद्वांसः, साधकाश्च स्वयमेव एतस्य दर्शनार्थं धर्मशालां प्रति आगन्तुम् आरब्धवन्तः। साधरणतया चर्चा बहुगभीरा आसीत्, कस्यापि समय–परिज्ञानमेव न भवति स्म। मध्याह्ने ये केऽपि भिक्षार्थम् एनं स्वगृहं नयन्ति स्म। कदाचित् साधकाः अपि एतस्य कृते भिक्षाम् आनयन्ति स्म। ऋजुस्वभावेन, उद्दामपाण्डित्येन, विनयेन, तेषां तेषां योग्यतानुसारं विचारबोधनस्य अद्भुतसामर्थ्येन च अयम् अतिशीघ्रं गुरुस्थानं प्रति नीतः।

एकस्मिन् दिने अपराह्णे सज्जनाः शङ्करं परितः उपविश्य संशयान् परिहरन्तः सन्ति। दूरे पृथगुपविष्टः एकः कुष्ठरोगी अपृच्छत्ः 'गुरुवर्याः! अन्तरात्मा ज्योतिःस्वरूपः इति महात्मनां प्रवचनेषु नैकवारं श्रुतवानस्मि। तस्य अर्थः कः?'

'वदामि, शृण्वन्तु। सर्वेषु जाग्रत्–स्वप्न–सुषुप्तयः इति तिस्रः अवस्थाः भवन्ति। जाग्रदवस्थायां मनसा, ज्ञानेन्द्रियाणां च द्वारा बाह्यविषयाणां ज्ञानं भवति। एतानि ज्ञानानि एव प्रज्ञाः। अतः जाग्रदवस्थायां विद्यमानस्य जीवस्य बहिष्प्रज्ञः इति नाम। अधुना वदन्तु, बहिष्प्रज्ञस्य दिवा वस्तूनि द्रष्टुं विद्यमानः प्रकाशः कः?

'सूर्यप्रकाशः।'

'सूर्यास्तादनन्तरम्?'

'चन्द्रस्य प्रकाशः।'

'सः नास्ति चेत्?'

'दीपस्य प्रकाशः।'

'सोऽपि नास्ति चेत्?'

'किमपि द्रष्टुं न शक्नोति।'

'अग्रे शृण्वन्तु। जाग्रद्व्यवहारेण आयासितं जीवं निद्रा बाधते। जाग्रदवस्थायाम् इव रथाः, अश्वाः, मार्गाश्च दृश्यन्ते। ते के?'

'जाग्रदवस्थायां दृष्टानां रथादीनां स्मृतिः।'

'तासां स्मृतीनां द्रष्टा अन्तःप्रज्ञः। तान् द्रष्टुम् अन्तःप्रज्ञस्य सूर्यादीनां प्रकाशः अस्ति किम्?'

'नास्ति।'

'तर्हि कथं पश्यति?'

'स्मृतौ विद्यमानानि प्रकाशितवस्तूनि एव पश्यति इत्यतः अन्यस्य प्रकाशस्य आवश्यकता का अस्ति?'

'तथा न। जाग्रदवस्थायां दीपं द्रष्टुम् अन्यः प्रकाशः नापेक्ष्यते, किन्तु दीपस्य चित्रम् अन्धकारे न दृश्यते; द्रष्टव्यं चेत् अन्यः प्रकाशः अपेक्ष्यते। स्वप्नदीपस्तु जाग्रद्दीपस्य स्मृतिचित्रम्। तं द्रष्टुं प्रकाशः आवश्यकः खलु?'

'आम्। अधुना ज्ञातम्। सः प्रकाशः कः इति अहं वक्तुं न शक्नोमि।'

'सः अपरः प्रकाशः बाह्यस्तु न; अन्तस्थः एव स्यात्। सः स्वप्नद्रष्टुः आत्मनः। अतः आत्मा ज्योतिःस्वरूपः।'

'तम् अहं किमर्थं न पश्यामि?'

'स्वप्नचित्राणां दर्शने एव मग्नः इत्यनेन न पश्यति।'

'स्वप्नद्रष्टुः आत्मा सुषुप्तेः अहमेव खलु?'

'न।'

'सः आत्मा कः?'

'सः सुषुप्तात्मनः अपि आत्मा।'

'तर्हि सुषुप्तौ वा आत्मज्योतिः द्रष्टव्यम् आसीत्। किमर्थं न दृश्यते?'

'तत् भवत्पृष्ठतः अस्तीत्यतः न दृश्यते।'

'सुषुप्तौ पुरतः पृष्ठतः इत्यादि नास्ति खलु?'

'तर्हि सुषुप्तात्मानः भवन्तः के इति वदन्तु?'

'अहं न जाने।'

'भवद्भिः भवन्तः न ज्ञायन्ते इत्यस्य अज्ञानस्य पृष्ठतः तस्य आत्मनः सद्भावः।'

'अहं कः?'

'सः आत्मा एव! तस्य अज्ञानं यावत् सुषुप्तात्मा!'

* * * * * * *

एकस्मिन् दिने एकः विद्यार्थी अपृच्छत् : 'केचन बौद्धाः जगत् शून्यम् इति वदन्ति, इतोऽपि केचन स्वप्नवत् कल्पना इति वदन्ति, केचन मीमांसकाः सृष्टिलयरहितं नित्यं वस्तु इति वदन्ति, सृष्टिलययोः अङ्गीकर्तारः केचन ईश्वरः अस्य निमित्तम्, प्रकृतिः उपादानम् इति च वदन्ति। केचन जगत् निर्निमित्ततया प्रकृत्याः स्वयमेव उद्भूतम् इति वदन्ति। श्रेष्ठविद्यास्थाने काश्यां पठामि इति अत्र उत्साहेन अस्माभिः आगतं चेत्, एकैकः एकैकं वदति। अस्मादृशानां विद्यार्थिनां भ्रमः सञ्जायते। संशयः यथा न स्यात् तथा कृपया अहं बोधनीयः इति भवतः प्रार्थये।'



Mahaparivrajaka

शङ्करः इत्थम् उदबोधयत् : 'शृणोतु, जगता जायमानानि कष्टानि सुखानि च सर्वेषाम् अनुभवः इत्यतः जगत् शून्यम् इति कथनं चर्चायाः अयोग्यः सिद्धान्तः। अतः तं त्यजतु। तत् स्वप्नवत् कल्पनापि न; यतो हि स्वप्ने दृष्टं व्याधिग्रस्तं सुहृदं जाग्रदवस्थायाम् अन्विष्य पश्यामश्चेत्, सः स्वस्थः एव भवति। अतः स्वप्ने दृष्टस्य सुहृदः जाग्रदवस्थायां दृष्टस्य सुहृदः च भेदः स्पष्टः। अतः जाग्रदवस्थायां दृश्यमानं जगत् स्वप्नवत् न। अनन्तरं केषाञ्चन मीमांसकानां सिद्धान्तान् भवान् उल्लिखितवान्। ते वेदम् अङ्गीकुर्वन्ति। संहितायामेव 'सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्। दिवं च पृथिवीं चान्तरिक्षमथो स्वः – ईश्वरः द्युलोकपृथिव्यन्तरिक्षस्वर्गान् यथापूर्वम् अकल्पयत्' इति उक्ते सति जगत् नित्यम् इति वचनं कथं समञ्जसं स्यात्? न भवति। अपि च, सर्वज्ञः ईश्वरः केवलं निमित्तम् इति, तस्मात् भिन्ना अनन्तप्रकृतिः उपादानम् इति च वदन्तः, तैः एव कथ्यमानम् ईश्वरस्य सर्वज्ञत्वम् उपपादयितुं न शक्नुवन्ति। कथमिति पश्यतु : प्रकृतिः अनन्ता इत्यतः मातुं न शक्या; तां मातुम् अशक्तः ईश्वरः सर्वज्ञः भवितुं नार्हति; अथवा माने प्राप्यते चेत् प्रकृत्याः अनन्तत्वमेव न भवति। अतः सः सिद्धान्तः अपि असमञ्जसः। इतःपरं, जडप्रकृत्या निमित्तकारणं विना एव जगत् जातम् इति वदतां सिद्धान्तः। अस्मिन् व्याघातदोषः अस्ति। कथमिति चेत् : स्वयमेव कमपि व्यवहारं यत् न करोति तत् जडम् इति प्रसिद्धम्। तत् ते अपि जानन्ति; अतः जडप्रकृतिः निर्निमित्ततया स्वयमेव प्रवृत्ता सती जगदाकारं प्राप्नोति इति स्वविरुद्धम्। एवं सर्वे सिद्धान्ताः असमीचीनाः। अस्य मूलहेतुः कः इत्युक्ते, एतेषां सर्वेषामपि अनुमानप्रमाणमेव आधारः। किन्तु तर्कस्य स्थगनं नास्ति। केनचित् एकेन अंशेन तेषां कल्पना तदनुकूला एव भासते चेदपि, अन्येन अंशेन अनुपपन्ना एव भवति। अतः एतादृशविचाराणां निश्चयार्थम् अन्यस्य प्रमाणस्य आवश्यकता अस्ति। तदेव श्रुतिः। तत् 'सोऽकामयत बहुस्यां प्रजायेयेति – अहं बहुभिः विधैः जनिं प्राप्नोमि इति सः अकामयत'[१] इत्यनेन परमात्मा एकः एव जगतः निमित्तम्, उपादानं च अस्ति इति सूचयति। अस्मिन् वाक्ये विश्वसितुम् आधाररूपेण ऊर्णनाभस्य तस्य जालस्य च दृष्टान्तमपि श्रुतिः ददाति। अयमेव समीचीनः सिद्धान्तः।'

प्रतिदिनम् एकाग्रतया मौनेन च एतानि सम्भाषणानि शृण्वन् कश्चन अनन्तरम् एकदा एकान्ते शङ्करम् अपृच्छत् :

१. तैत्तिरीयोपनिषत् २.६

'मम नाम पृथ्वीधरः इति। मम एकः प्रश्नः अस्ति। प्रष्टुं शक्नोमि किम्?'

'अवश्यमेव।'

'घटादिकार्याणां कुलालः निमित्तं, मृत् च उपादानम्। आकारसृष्टेः व्यवहारः कुलालस्य। किन्तु मृत् घटाद्याकारान् प्राप्नोति चेदपि सर्वदापि मृद्रूपेण एव तिष्ठति इत्यतः तस्यां व्यवहाररहितं प्रत्यक्षम्। पुनश्च, दार्ष्टान्ते ब्रह्म जगतः अभिन्ननिमित्तोपादानं चेत्, निमित्तत्वद्वारा व्यवहारः नास्ति इति विरोधः आपतति। अस्य परिहारः कथम्?'

स्थितः सः पृथ्वीधरः शङ्करस्य अनुज्ञया उपविष्टः। शङ्करः अवदत् :

'परिहारः कथमिति पश्यतु। श्रुत्या कथ्यमानं ब्रह्मणः निमित्तत्वं मुख्यार्थे न, गौणार्थे। मुख्यार्थे निमित्तकारणं प्रथमजः हिरण्यगर्भः, ईश्वरः न। यतो हि ईश्वरः प्रवृत्तिरहितः। 'अनेन जीवेनात्मना अनुप्रविश्य नामरूपे व्याकरवाणि – अस्य जीवात्मनः रूपेण प्रविश्य नामरूपयोः विभजनं करोमि' इति उक्त्वा अस्मिन् प्रविशति। अस्मिन् जीवे सृष्ट्यादिव्यवहाराय आवश्यकी प्रवृत्तिः अस्ति, किन्तु सामर्थ्यं नास्ति। अस्मिन् दृश्यमानं सामर्थ्यं ब्रह्मशक्तेः प्रकृत्याः। अतः, गृहनिर्माणकार्यं साक्षात् गृहकारद्वारा प्रवर्तते चेदपि, निर्वहणसामर्थ्यदातारं गृहस्वामिनं गृहनिर्माता इति यथा वदामः तथा श्रुतिः ब्रह्मणि निमित्तकारणत्वस्य अध्यारोपं करोति। अतः तत् गौणार्थे स्वीकर्तव्यम्। किन्तु ब्रह्मणः उपादानत्वं मुख्यार्थे एव; तेन तस्य अव्यवहार्यस्वरूपस्य भङ्गः नास्ति।'

अतीव तृप्तः पृथ्वीधरः 'अहं मध्ये मध्ये भवतां दर्शनार्थम् आगच्छामि चेत् क्लेशः न भवेत् खलु?' इत्यवदत्।

'सर्वथा नास्ति। भवान् यदा कदापि आगन्तुं शक्नोति।'

सर्वदापि शङ्करं परितः जनाः भवन्ति। मध्याह्ने अघोषितः प्रश्नोत्तरसमयः। तदा तु विद्यार्थिनः, साधवः च अवश्यम् उपस्थिताः भवन्ति स्म। एकदा भाषणं कुर्वतः एव सायङ्कालः अभवत्। शङ्करः 'इतःपरं स्नानार्थं गन्तव्यम्' इति उत्थितवान्। 'वयमपि आगच्छामः' इति बहवः शिष्याः तम् अनुसृतवन्तः। ग्रीष्मकालः इत्यस्मात् कारणात् स्नानघट्टे अधिकाः जनाः। शङ्करे स्नानार्थम् अवतरति सत्येव नदीप्रवाहे शङ्करात् उपरिभागे विद्यमानाः अधः गतवन्तः। सः स्नात्वा, भस्मधारणं च कृत्वा दण्डं, गङ्गाजलोपेतं कमण्डलुं च गृहीत्वा प्रस्थितः। भक्ताः जनान् इतस्ततः सारयन्तः शङ्कराय मार्गं कल्पयन्ति स्म। मध्येमार्गं चतुर्भिः शुनकैः समेतः एकः चाण्डालः



तस्यां दिशि मुखं कृत्वा उपविष्टवान् आसीत्। कश्चन भक्तः उच्चैः अवोचत् 'रे! उत्तिष्ठ। तावदपि न जानासि किम्? दूरं गच्छ। मार्गं त्यज।'

सः शनैः शनैः उत्थाय एकवारं शङ्करम् एकवारं भक्तं च दृष्ट्वा अवदत् : 'कम् उद्दिश्य दूरं गन्तुं वदन् अस्ति भोः? शरीरम् उत आत्मानम्?'

एकदृष्ट्या भक्तः तम् अपश्यत्। किं वक्तव्यमिति न ज्ञातम्। चाण्डालः एव अनुवर्तितवान् : 'शरीरं चेत् तस्य उत्थाय गमने कारणं नास्ति। सर्वेषामपि शरीराणि मृदा एव जनिं प्राप्य सप्तधातुभिः युक्तानि सन्ति। अपि च, प्रत्यगात्मा तु शरीरसम्बन्ध-रहितः इति गाढनिद्रायां सर्वेषाम् अनुभवः। कः उत्थाय गच्छेत्, वदतु भोः?'

न केवलं सः भक्तः, अपि तु तत्र विद्यमानाः सर्वेऽपि दिङ्मूढाः अभवन्। तूष्णीं स्थितवन्तः। अन्ते शङ्करः अवदत् :

'भोः! भवान् तत्त्वं समीचीनतया ज्ञातवान् अस्ति। शास्त्राध्ययनं कृतवद्भिः अपि दुष्प्राप्यं तत्त्वं भवतः हृद्गतमस्ति। भवान् महात्मा एव। भवान् मम गुरुसमानः।'

एतत् श्रुत्वा सः चाण्डालः मन्दहासपुरस्सरं शुनकैः सह विश्वनाथमन्दिरदिशि अगच्छत्। शङ्करस्य वचनं श्रुत्वा केषाञ्चन सन्तोषः अभवत्, केषाञ्चन आश्चर्यम् अभवत्, कैश्चित् नावगतम्।

परेद्यवि मध्याह्ने यथापूर्वं सभा। सर्वे मौनेन विद्यन्ते। कोऽपि न किमपि पृष्टवान्, न किमपि उक्तवान् च। शङ्करः एव वक्तुम् आरभत –

'स्वम् आत्मा इति ज्ञानस्थितिः मोक्षः जीवनस्य सर्वश्रेष्ठं लक्ष्यम्। अयम् आत्मा अत्यन्तं परिशुद्धः। अस्य देहेन्द्रियादीनां सम्बन्धः एव नास्ति। एवं चेदपि आत्मा मनसा एव ज्ञातव्यः। मनः तु आत्मसमपरिशुद्धताप्राप्तिं विना आत्मानं ज्ञातुं न शक्नोति। मनसः शुद्धीकरणं कथम्? विहितकर्मणः निष्कामाचरणेन केवलं मनः शुद्धं भवति। अपि च कर्मकरणावसरे शरीरं शुद्धं स्यात्। एतदर्थं सम्प्रदाये एव नैके नियमाः आगताः। पञ्चषवर्षाणां बाल्यानन्तरम् अपत्यानि, पितरौ च परस्परं न स्पृशन्ति। रजस्वला स्त्री तु कस्यापि सम्पर्कः यथा न स्यात् तथा दूरे तिष्ठति। रोगिणः स्पृष्ट्वा सेवाकरणस्य अनिवार्यप्रसङ्गेषु आगतेषु सत्सु, सेवानन्तरं स्नात्वा एव अन्यानि कार्याणि कुर्वन्ति। जाताशौचमृताशौचयोः अपि एवमेव। अस्मासु न कोऽपि कमपि स्पृशति। एतादृशः व्यवहारः बुद्धेः शुद्धीकरणार्थम् आवश्यकः।'

'एतस्य सर्वस्य श्रवणानन्तरं ह्यः सायङ्काले नद्याः समीपे प्रवृत्तं प्रसङ्गं स्मरन्तु। नद्यां स्नात्वा आगन्तृभिः कमपि अस्पृष्ट्वा पूजादिकार्यं प्रति गमनं दोषः इति न

Maha Parivrajaka

कोऽपि वदति। किन्तु नदी सार्वजनीनं स्थलम्। तत्र सर्वेषां जनानां मुक्तः प्रवेशः अस्ति। अशुद्धाः केऽपि मध्ये सन्ति चेत् तेषां स्पर्शः यथा न स्यात् तथा गमनम् अत्युत्तमम्। तस्य अवसरः नास्ति चेत् 'कृपया पार्श्वे गच्छन्तु' इति विज्ञापना न दोषाय। किन्तु मार्गः केवलम् अस्माकं कृते एव आरक्षितः इति मत्वा, अशुद्धान् नीचरूपेण परिगणय्य, 'दूरं गच्छ' इति उच्चैः कथनं न समीचीनम्। स्मृतयः अपि नदी, तडागः, कूपः, मार्गः इत्यादिषु सार्वजनिकस्थलेषु सर्वेषामपि समानाधिकारं वदन्ति। देवालयेषु गर्भगृहे अर्चकं विना अन्येषां प्रवेशः नास्ति चेदपि, देवदर्शनं कर्तुं कस्यापि निर्बन्धः नास्ति। कः नीचः? कः उच्चः? सर्वेषु अपि एकः एव परमात्मा अस्ति इत्यतः एव खलु वेदाः 'नमः पुञ्जिष्टेभ्यः नमो निषादेभ्यः – पक्षिग्राहकाय नमस्कारः, व्याधाय नमस्कारः, ब्रह्म दाशा ब्रह्म दासा ब्रह्मैवेमे कितवाः – धीवराः ब्रह्म, कर्मकराः ब्रह्म, कितवाः ब्रह्म' इति वदन्ति! अतः एव ज्ञानिनः 'शुनि चैव श्वपाके च पण्डिताः समदर्शिनः' – शुनके, चाण्डालादिषु च समदर्शिनः भवन्ति। अतः हृदये यस्य कस्यापि विचारे नीचभावना न स्यात्। कोऽपि उपेक्षया न द्रष्टव्यः। एकः शिशुः अपि उपेक्षया न द्रष्टव्यः।'

एतावत् उक्त्वा अनन्तरं किञ्चिदपि अनुक्त्वा शङ्करः उत्थाय प्रकोष्ठम् अगच्छत्। स्वल्पसमयानन्तरं जागरूकतया मन्दं मन्दं पदं निक्षिप्य प्रकोष्ठं प्रविष्टः पृथ्वीधरः, शङ्करं साष्टाङ्गं नत्वा उत्थाय स्थितवान्। शङ्करः तस्मिन् दिने प्रातः लिखितं मनीषापञ्चकस्तोत्रं तस्मै प्रायच्छत्। तत् शनैः शनैः पठित्वा पृथ्वीधरः 'भवताम् अनुग्रहः सर्वदा मयि भवतु' इत्युक्त्वा आनन्देन आर्द्रे नेत्रे परिमार्जितवान्।

* * * * * * *

एकस्मिन् दिने मध्याह्नस्य प्रश्नोत्तरसभा समाप्ता। अनन्तरम् एकः युवकः शङ्करस्य समीपम् आगतः। प्रायः पञ्चविंशतिवर्षीयः। किञ्चित् श्मश्रु, कृष्णवर्णः, शान्ते नेत्रे, जानुभ्यां स्वल्पम् अधः यावत् वेष्टिः, उत्तरीयम्। प्रश्नोत्तरसभायाः आरम्भतः तस्मिन् समये विना भङ्गम् आगत्य, कोणे मौनेन उपविश्य, श्रुत्वा गुरून् नमस्कृत्य गच्छति स्म। तस्मिन् दिने नमस्करणानन्तरं मौनं परित्यज्य 'अहं भवद्भिः सह वैयक्तिकरूपेण भाषितुम् इच्छामि। कदा आगच्छामि?' इत्यवदत्।

'भवतः यदा समयः भवति तदा आगच्छतु। भिक्षास्नानयोः समयं विहाय अहं सर्वदा अत्रैव भवामि।'



'अधुना एव भवतु वा?'

'अस्तु।'

प्रकोष्ठे प्रवेशानन्तरं 'गुरुवर्याः! मम नाम विष्णुशर्मा। अहमेतत् अत्र कमपि नोक्तवान् आसम्। कश्चित् मां सनन्दन इति आहूतवान्। ततः आरभ्य अत्र सर्वे माम् एतेनैव नाम्ना आह्वयन्ति। अहं चोळदेशीयः ब्राह्मणः। बाल्ये एव पिता मृतः। सहजाः केऽपि न सन्ति। सद्यः एव माता अपि मृता। मम कुटुम्बे आसक्तिः नास्ति। मां भवतां शिष्यरूपेण परिगृह्णन्तु इति प्रार्थये।'

'अध्ययनं किमपि जातं वा?'

'स्वशाखावेदाध्ययनं जातमस्ति।'

'भवतः शाखा का?'

'सामशाखा'

'इतोऽपि किम् अधीतम्?'

'प्रायः वर्षद्वयात् काश्याम् अस्मि। कानिचन काव्यानि, स्वल्पं व्याकरणं च पठितम्। किन्तु मम तेषु तथा आसक्तिः नास्ति। वेदान्ताध्ययने अभिलाषः अस्ति। तत् अत्र आतृप्ति अध्येतुम् अवसरः न प्राप्तः।'

'मध्याह्ने प्रतिदिनं भवन्तं पश्यामि। तत्रत्याः चर्चाः भवता अवगम्यन्ते किम्?'

'आम्। अतः एव भवतः शरणमागतः।'

'अहम् इतःपरं कतिपयदिनेषु बदरीनाथं प्रति गमिष्यामि। तत्र महत् शैत्यम् इति श्रुतम्। भवान् चोळदेशस्थः। तत्र वस्तुं शक्नोति किम्?'

'तत्सर्वं सोढुं सज्जः सन्नेव आगतः अस्मि।'

'तर्हि आगच्छतु।'

इतः दिनद्वयानन्तरं शङ्करः बदरीनाथं प्रति प्रतिष्ठते इति श्रुत्वा, तस्य अनुज्ञां प्राप्य पृथ्वीधरः अपि तेन सह अगच्छत्।

* * * * * * *

शङ्करः बदरीनाथं प्रति प्रस्थातुं सज्जतां कुर्वन् अस्ति इति ज्ञात्वा अनुक्षणं काश्याः सर्वे साधवः, विद्वांसः च स्वेषां व्यवहारान् परित्यज्य धर्मशालां प्रति गतवन्तः। 'किमिदम्, एतावत् शीघ्रं प्रस्थानं क्रियते? अस्माभिः कोऽपि अपचारः न कृतः खलु? भवन्तः अत्रैव निवसन्ति इति सर्वे वयं चिन्तितवन्तः आस्म'

MahaParivrajaka

इत्यवदन्।

'तथा न। सद्यः मया उद्दिष्टं कार्यं सम्पन्नम्। पुनः आगमिष्यामि। भवन्तः सर्वे मां सत्कृत्य मम आवश्यकतायाः अपेक्षया अधिकानि सौविध्यानि कल्पितवन्तः। अहं भवताम् अधमर्णः। अधुना कृपया प्रेषयन्तु।'

'पुनः कदा आगम्यते?'

'द्वित्रवर्षाणाम् अनन्तरं स्यात्।'

प्रस्थातुं सज्जं पृथ्वीधरं दृष्ट्वा एकः विद्वान् अपृच्छत् : 'आचार्यः! भवान् अपि प्रस्थितवान् किम्?'

'आम्।'

'तर्हि, विद्यालये भवतः उद्योगः?'

'सः त्यक्तः मया।'

'भवान् तु इतोऽपि ब्रह्मचारी। दायित्वानि न कानिचन सन्ति। किमपि कर्तुं प्रभवति। भवान् एव पुण्यवान् भोः!'

## ५. बदरीनाथं प्रति

बदरीनाथं प्रति प्रयाणम् आरब्धम्। हरिद्वारहृषीकेशयोः क्रमणमनु एकपदीषु प्रयाणम्। पृथ्वीधरः अवदत् : 'सनन्दन! अनेन पर्वतप्रदेशेन अहं बहुशः परिचितोऽस्मि। अहम् अग्रे भवामि। भवान् पृष्ठतः तिष्ठतु। गुरवः मध्ये भवन्तु।' तेनैव क्रमेण चलितवन्तः। हिमालयपर्वताः दृष्टिगोचरीभूताः। ते परशिवस्य वासस्थानभूताः। ज्ञानिनां, मुमुक्षूणां च परमं धाम। पद्भ्यां चलनावसरे एकस्मिन् पार्श्वे उन्नतशिखराणि, अपरस्मिन् पार्श्वे प्रपाताश्च। मुख्येषु खातेषु लोकपावनी गङ्गा, यमुना च। लघुषु खातेषु एते प्राप्तुम् उत्साहेन प्रवहन्त्यः लघुनद्यः। असङ्ख्याः निर्झरिण्यः। तत्र तत्र जलपातानां निर्घोषः; तत्र तत्र योगिजनान् समाधिं प्रति नयत् मौनम्। गगनचुम्बिवृक्षाः, सस्यानि, लताः, गुल्माः च। महद्भ्यः मधुमक्षिकानीडेभ्यः श्रूयमाणः मक्षिकाणां झङ्कारः, विविधाः पक्षिणः, सर्पाः, दुष्टमृगाश्च। तत्र तत्र एकैकः ग्रामः, मुग्धजनाः। पत्तनस्थानाम् आडम्बरः, आटोपः, वञ्चना च नास्ति। तत्र गच्छतां गुरूणां, द्वयोः शिष्ययोः च तेभ्यः एव भिक्षा। ईषद्दूरं गम्यते चेत् एकः आश्रमः। इतोऽपि किञ्चित्



दूरं गम्यते चेत् एकं मन्दिरम्। एतान्येव एतेषां रात्रौ वसतिस्थानानि। एकैकस्मात् स्थानात् निर्गमनावसरे अपि 'अत्रैव तिष्ठन्तु, अत्रैव तिष्ठन्तु' इति शङ्करस्य कृते अनुरोधः। अन्ते एकस्मिन् दिने बदरीनाथं प्राप्तवन्तः।

शङ्करं, सनन्दनं च एकत्र उपवेश्य पृथ्वीधरः धर्मदर्शिनः दृष्ट्वा धर्मशालायां प्रकोष्ठद्वयं प्राप्तवान्। प्रकोष्ठप्राप्तिसमये सायङ्काले पञ्चवादनम्। स्वल्पं विश्रम्य अनन्तरं त्रयः अपि अलकनन्दायां स्नानम् अकुर्वन्।

'अन्धकारः जायमानोऽस्ति। मन्दिरस्य द्वारम् उद्घाटितम् अस्ति चेत् दर्शनं कृत्वा आगन्तुं शक्यं खलु?' इत्यवदत् शङ्करः।

'उद्घाटितं भवति, गच्छाम' इत्यवदत् पृथ्वीधरः। त्रयः अपि मन्दिरं प्राविशन्। किमाश्चर्यम्! तत्र बदरीनाथस्य विग्रहः एव नास्ति! जनाः रिक्तं पीठं नमस्कृत्य आगच्छन्तः सन्ति! किमिति विचारिते सति विचारः ज्ञातः। बहुभ्यः वर्षेभ्यः पूर्वं पुष्यमासस्य शैत्यकाले निर्जनं समयं संसाध्य बौद्धाः विग्रहम् उत्पाट्य अलकनन्दायां क्षिप्त्वा गतवन्तः। एतत् श्रुतवतः शङ्करस्य मुखभावः गम्भीरः अभवत्। सनन्दनस्य आश्चर्यमभवत्। शङ्करः पृथ्वीधरस्य मुखम् अपश्यत्। सः 'बौद्धानाम् इतिहासस्य परिचयः मम प्रायशः अस्ति। अतः इदं श्रुत्वा मम आश्चर्यं न भवति, दुःखं भवति, तावदेव' इत्यवदत्। सा रात्रिः प्रायशः मौनेन एव अतीता।

परेद्यवि पृथ्वीधरः मन्दिरस्य अध्यक्षं द्रष्टुम् अगच्छत्। तस्मिन् गृहं प्रविशति सत्येव ब्रह्मदत्तः एव आगत्य दृष्ट्वा, 'अहो! भवन्तः काशीविश्वविद्यालयस्य आचार्याः खलु? वर्षत्रयात् पूर्वं मयि यात्रार्थं तत्रागते सति दृष्टवान्, स्मरणे अस्ति' इत्यवदत्।

'महाशय! मया इदानीम् आगमनकारणमुच्यते। एकेन बालसंन्यासिना सह अहमधुना आगतवान्। शङ्करभगवत्पादः इति अभिधानम्। अत्रागमनात् पूर्वं ते मासं यावत् काश्याम् आसन्। तदा अहं तान् प्रतिदिनं पश्यामि स्म। तैः सह वार्तालापं करोमि स्म। एकेनैव वचसा वक्तव्यं चेत् ते परशिवस्य अवतारभूताः इति मया दृढतया ज्ञातम्। तेषां गुरवः ओङ्कारेश्वरस्य गोविन्दभगवत्पादाः। तेषाम् आदेशानुसारं ब्रह्मसूत्राणां भाष्यं रचयितुं ते अत्र समागताः। तेभ्यः भवता सर्वविधसौकर्याणि अपि कल्पनीयानि इति मम प्रार्थना।'

'आचार्य! ततोऽप्यतिशयं भाग्यं मम किं स्यात्। अवश्यमेव व्यवस्थां करोमि। किं किम् आवश्यकम् इति कथनमेव भवतः कार्यम्।'

'पश्यतु, लेखनार्थं व्यासपीठं, लेखनी, मशी ताडपत्राणि च आवश्यकानि।

Mahaparivrajaka

वृष्टिबिन्दवः पतन्ति चेत् ताडपत्राणि नश्यन्ति, तथा न भवेत्। अतः वसतिस्थानं लेखनयोग्यं स्यात्। अपि च भिक्षार्थं, शयनार्थं च व्यवस्था भवेत्। तैः सह आवां द्वौ स्वः। अस्मभ्यम् अपि भोजनवसतिव्यवस्था भवेत्।'

'भवदुक्तरीत्या सर्वा अपि व्यवस्था भवितुम् अर्हति। वासः धर्मशालायां मास्तु। तत्र यात्रार्थिनां कोलाहलः। ग्रन्थरचनार्थं शान्तं स्थलम् अपेक्ष्यते। व्यासगुहायां सर्वं समीचीनमस्ति। तत्र वृष्टिजलं न पतति। शैत्यमपि न्यूनम्। तस्याः गुहायाः पार्श्वे अन्या एका लघ्वी गुहा अस्ति। तत्र भवन्तौ द्वौ वस्तुं शक्नुतः। शय्याः, स्थूलान् कम्बलान् च प्रेषयिष्यामि। अनन्तरं भिक्षाविषये, शैत्यकाले तु अहम् अत्रैव भवामि। त्रयाणामपि भिक्षा अत्रैव भवतु। भवन्तः कियन्तं कालं यावदपि वस्तुं शक्नुवन्ति। लेखनार्थं भवद्भिरुक्तं सर्वम् अपि सज्जीकरोमि। भवद्भिः यस्मिन् कस्मिन्नपि समये सङ्कोचं विना प्रष्टव्यम्।'

झटित्येव द्वे गुहे अपि वासार्थं सज्जीकृते। व्यासगुहायाः एकस्मिन् कोणे लेखनार्थं, अपरस्मिन् पार्श्वे शयनार्थं च परिपूर्णा व्यवस्था अभवत्। तैलपात्रस्य, बहुवर्तिकायुक्तयोः प्रज्वलतोः द्वयोः बृहद्दीपयोः व्यवस्था अभवत्। ब्रह्मदत्तः धर्मशालां गत्वा, शङ्करं साष्टाङ्गं नमस्कृत्य, भक्त्या तं व्यासगुहां प्रति आनीतवान्। 'गुरुवर्याः! भवताम् आगमनेन अस्माकं ग्रामः पवित्रः अभवत्। महाकार्यं साधयितुं भवन्तः अत्र समागताः। भवतां सेवाकरणभाग्यम् अस्माकं भवतु। भवद्भिः, निस्सङ्कोचम् अस्मभ्यम् आज्ञाप्य अपेक्षितं सर्वं प्राप्तव्यम्' इत्यवदत्। जातां व्यवस्थां दृष्ट्वा शङ्करः अवदत् : 'ब्रह्मदत्तवर्य, भवद्भिः कृता व्यवस्था अतीव समीचीनास्ति। इतःपरं निश्चिन्ततया कार्ये प्रवर्तितुं शक्यम्। सपरिवारस्य भवतः बदरीनाथस्य पूर्णः अनुग्रहः भवतु' इति।

द्वित्राणां दिनानाम् अनन्तरं शङ्करः 'श्वः आरभ्य भाष्यरचनाकार्यस्य आरम्भः स्यात्' इत्यवदत्।

पृथ्वीधरः 'गुरुवर्याः! भवन्तः अस्तु इति वदन्ति चेत्, भवत्सु वदत्सु एव अहं तत् लिखामि' इत्यवदत्।

'भवन्तः अस्तु इति वदन्ति चेत् अहमपि लेखितुं शक्नोमि' इति सनन्दनः अपि अवदत्।

'तथैवास्तु। उभावपि लिखताम्।'

तस्मिन् दिने द्वौ शिष्यौ अपि गुरूणाम् अपेक्षया पूर्वमेव उत्थाय स्नानाह्निकादिकं



समापयन्तौ स्तः, तावता शङ्करः नदीं प्रति आगतवान्। सनन्दनः गुरूणां सेवार्थं तत्रैव स्थितवान्। पृथ्वीधरः गुहां प्रति गत्वा गुरूणां, तयोः द्वयोः च आसनानि सज्जीकृतवान्। व्यासपीठं स्वस्य पुरतः संस्थाप्य, सूत्रग्रन्थम् एकस्य शुभ्रवस्त्रस्य उपरि संस्थाप्य, पुष्पैः अलङ्कृत्य धूपं ज्वालितवान्। तत्र शङ्करः स्नानं, प्रणवजपं च समाप्य, गुरून् स्मरन् नैर्ऋत्यदिशि साष्टाङ्गं नमस्कृतवान्। ततः आगत्य गुहां प्रविश्य आसने उपवेशनानन्तरं द्वावपि शिष्यौ तं नमस्कृतवन्तौ। कतिपयनिमेषाणां ध्यानानन्तरं त्रयः अपि मिलित्वा 'शं नो मित्रः' इत्यादीन् दश शान्तिमन्त्रान् पठितवन्तः। अनन्तरः शङ्करः वक्तुम् आरभत–

'आदौ ब्रह्मसूत्राणां स्थूलरूपं जानन्तु। एतानि उपनिषद्वाक्यानां विमर्शं कर्तुं प्रवृत्तानि। सर्वास्वपि उपनिषत्सु ध्येयम् एकमेव अस्ति। किन्तु विचारस्य स्पष्टीकरणावसरे प्रसङ्गानुसारेण पदानि, वाक्यानि च प्रयुज्जते इत्यतः उपनिषदां ध्येयस्य अभिज्ञानं कष्टं भवति, संशयाश्च सञ्जायन्ते। ब्रह्मसूत्राणां प्रवृत्तिः एतेषां परिहारार्थम्। एतानि चतुर्षु अध्यायेषु विभक्तानि। आदिमः समन्वयाध्यायः। सर्वाः अपि उपनिषदः आत्मनामकस्य परमपुरुषस्य निर्णये एव समन्विताः भवन्ति इति अस्मिन् दर्शितम्। अयं जगत्कारणं ब्रह्म एव। ब्रह्म वाङ्मनोभ्यां प्राप्यमाणं न इति तस्य निरुपाधिकं स्वरूपम्। जगतः उपाधिरूपेण परिगणनायां तदेव सविशेषब्रह्मरूपेण दृश्यते। इदम् उपास्यब्रह्म। द्वितीयः अविरोधाध्यायः। अस्मिन् जगत् ब्रह्मणः भिन्नं न, किन्तु ब्रह्म जगतः भिन्नम्' इति दर्शितम्। ब्रह्मणः जगत्कारणत्वस्य अनङ्गीकर्तृणां सिद्धान्तानां खण्डनमस्ति। सृष्टिक्रमस्य निश्चयद्वारा उपनिषद्वाक्येषु तद्विचारे विरोधः नास्तीति दर्शकः एव अविरोधाध्यायः। तृतीयः साधनाध्यायः। अस्मिन् जीवस्य स्वरूपं निरुपाधिकं ब्रह्म एव इति प्रदर्श्य, तत् अनुभववेद्यं कर्तुम् आवश्यकानि साधनानि सूचितानि। चतुर्थः फलाध्यायः; मोक्षफलस्य लक्षणानां सूचकः। ज्ञानिनः सर्वकर्मणां नाशः, अपुनरावर्तिनां च चर्चा अस्मिन् अस्ति। प्रत्यध्यायं चत्वारः पादाः सन्ति। प्रतिपादमपि बहूनि अधिकरणानि सन्ति। एतानि आहत्य १९२ सङ्ख्याकानि। एकैकस्मिन् अपि बहूनि सूत्राणि सन्ति। कानिचन एकैकेन एव सूत्रेण युक्तानि सन्ति। ब्रह्मसूत्रेषु आहत्य ५५५ सूत्राणि विद्यन्ते।

एकैकस्मिन् अधिकरणे अपि अनुसरणक्रमः इत्थम् : पूर्वविषयेण सह सम्बन्धं सूचयति सङ्गतिः; अनन्तरं, तस्मिन् चर्चार्थं स्वीकृतः विषयः; चर्चायाः अवसरदाता संशयः; संशयपरिहारसमये जायमानाः आक्षेपाः पूर्वपक्षः; आक्षेपनिवारणानन्तरं

निश्चीयमानः स्वपक्षः एव सिद्धान्तः। एतेषां पञ्चानाम् अंशानां क्रमेण एव सिद्धान्तस्य निश्चयः भवेत्।'

सनन्दनः एकं प्रश्नम् अपृच्छत् : 'प्रथमाधिकरणस्य सङ्गतिः का?'

'पश्यतु, आदिमं जिज्ञासाधिकरणम्। तस्मिन् विद्यमानं सूत्रम् एकमेव – 'अथातो ब्रह्मजिज्ञासा'। जिज्ञासा इत्युक्ते ज्ञातुम् इच्छा। किं ज्ञातुम्? ब्रह्म। अतः ब्रह्म जिज्ञासाविषयः।'

'ब्रह्म ज्ञातुम् इच्छा किमर्थं भवेत्?'

'तस्य ज्ञानेन मोक्षः प्राप्यते।'

'को नाम मोक्षः?'

'दुःखलेशरहितः नित्यानन्दः।'

'शास्त्रम् अधीतवन्तः अपि दुःखम् अनुभवन्ति खलु?'

'आम्, ब्रह्मज्ञानानन्तरं तत् अहमेव इति अनुभवे जाते सत्येव मोक्षप्राप्तिः।'

'ब्रह्म जगत्कारणम्, सर्वदापि समानं भवति। अहं तु अस्य जगतः एकः अंशः, जनिं प्राप्य मरणं प्राप्नुवन् अहं ब्रह्म इति अनुभवः एव अशक्यः खलु!'

'भवान् कः इति वदतु।'

'अहं सनन्दनः, ब्रह्मचारी।'

'ह्यः रात्रौ भवान् स्वप्ने कुत्र आसीत्?'

'काश्याम् अटन् आसम्।'

'काश्याम् अटन् स्थितः भवान् वा? बदरीनाथगुहायां शयितः भवान् वा?'

उभावपि शिष्यौ हसितवन्तौ। किं वक्तव्यम् इति न ज्ञातम्। शङ्करः एव अनुवर्तितवान् : 'ह्यः रात्रौ सुषुप्तौ कुत्र आसीत्? केन रूपेण आसीत्? वदतु।'

'न किमपि जाने।'

'एवं सुषुप्तौ भवतः अस्तित्वे संशयः नास्ति चेदपि, भवान् कः इति न जानाति। एतदेव भवतः अज्ञानम्। तत्र भवतः शरीरेन्द्रियैः सह सम्बन्धः एव नास्ति। तथापि जाग्रदवस्थायां शरीरेण सह सम्बन्धं प्रकल्प्य भवान् आत्मानं सनन्दनः इति असाधुतया चिन्तयति। अयमेव भवता क्रियमाणः अध्यासः। सुषुप्तौ विद्यमानः भवान् ब्रह्म इति श्रुतिः वदति। तस्य भवता अवगमनं ज्ञानम्। अधुना 'जगत् ब्रह्मणः भिन्नं न, किन्तु ब्रह्म जगतः भिन्नम्' इति पूर्वोक्तं स्मरतु। तदा भवता, 'जगत् मत्तः भिन्नं न, किन्तु अहं जगतः भिन्नः' इति ज्ञायते। शरीरसम्बन्धः नश्यति। भवान् मुक्तः भवति। अतः,



भवान् कः इति भवान् न जानाति इति भवतः अभिज्ञानम् एव जिज्ञासाधिकरणस्य सङ्गतिः।'

अग्रिमः प्रश्नः पृथ्वीधरस्य : 'सुषुप्तात्मा सन्मात्रः इति सर्वेषाम् अनुभवः; अस्ति' इत्यपेक्षया अधिकं तद्विषये किमपि वक्तुं न शक्यते। श्रुतिः सुषुप्तात्मानम् एव ब्रह्म इति वदति। अतः ब्रह्म सन्मात्रम् एव भवेत्। सन्मात्रब्रह्मणः जगत् कथं जायते?'

'अयम् आक्षेपः केवलम् अनुमानेन जातः। पश्यतु, सन्मात्रब्रह्मणः जगतः जन्म साध्यम् इति, असाध्यम् इति वा अनुमानप्रमाणेन सिद्धं न भवति; इत्युक्ते, ब्रह्मणः जगत्कारणत्वम् अनुमानस्य विषयः एव न; केवलं श्रुतिप्रमाणस्य विषयः। अतः श्रुतिशरणाः तत् श्रुतिः यथा वदति तथा एव स्वीकुर्युः।'

'तदेव समीचीनम्। अनेन, श्रुतिप्रमाणेन ब्रह्मैकत्वं, प्रत्यक्षप्रमाणेन नानात्वम् – इति उभयमपि स्वीकर्तव्यम् इत्यभवत्; यतो हि एकेन प्रमाणेन सह अन्यप्रमाणस्य वैरुध्यं भवितुं नार्हति। एतेन जीवदवस्थायां केवलं कर्म अथवा ज्ञानसमुच्चयकर्म, मरणानन्तरं च इतरे लोकाः मोक्षश्च प्राप्यते; एवं कर्म ज्ञानं च समन्विते भवतः। तत् परित्यज्य जगत् निराक्रियते चेत् तेन बौद्धमतस्य सहकारः प्राप्येत इति मम भयम्।'

'सर्वथा न प्राप्यते। कथमिति पश्यतु। जगत् ब्रह्मणः अपेक्षया भिन्नं न इत्यतः स्वरूपे सत्यब्रह्म एकमेव अवशिष्यते; तस्मिन् जगत् सर्वथा नास्ति। जगद्विचारे कारणदृष्टौ सत्याम् अयं ज्ञेयः विषयः। कार्यदृष्टौ जगत् दृश्यते चेत् तत् असत् न। असत्यम् – इत्युक्ते परिणामशीलम्। अथापि तस्मिन् सत्यब्रह्म अन्तर्गतम् इत्यतः व्यवहारयोग्यम् अस्ति। इत्युक्ते जगत् ब्रह्म इव पारमार्थिकं सत्यं न, व्यावहारिकसत्यम्। इतोऽपि अग्रे पश्यतु। असत्यजगता सह कर्मसमन्वयः, सन्मात्रब्रह्मणा सह मोक्षसमन्वयः च भवति। एवं स्थितौ श्रुतिसिद्धान्ते शून्यवादस्यापि अवसरः नास्ति, ज्ञानकर्मसमुच्चयस्यापि अवसरः नास्ति, मरणानन्तरमेव मोक्षः इत्यस्यापि अवसरः नास्ति।'

'तथा चेत् कर्मसम्बन्धरहितं ज्ञानम् इत्युक्ते किम्?'

'वास्तवरूपेण स्वस्मात् अभिन्नं जगत् अज्ञानेन भिन्नम् इति यः चिन्तयति सः कर्मी भवति। अभेदबुद्धिमान् कर्मरहितः ज्ञानी भवति। इदम् अभेदज्ञानमेव आत्मज्ञानम्। अयमेव श्रुत्या उच्यमानः सर्वात्मभावः। श्रुतिः अपरं ज्ञानमपि वदति। इदं ज्ञानं भेदबुद्ध्या धृतम् उपास्यदेवताज्ञानम्। अस्मिन् ज्ञानकर्मसमुच्चयः अस्ति, गत्यगतयः

MahaParivrajaka

अपि सन्ति। पूर्वम् उक्तः सद्योमुक्तिनामकः श्रुत्युक्तमोक्षः।’

अनन्तरं शङ्करेण भाष्यकथनं, शिष्यैः लेखनं च आरब्धम्। स्वल्पकालं पृथ्वीधरः, स्वल्पकालं सनन्दनश्च लिखति । लेखनावसरे तत्र तत्र जायमानान् संशयान् गुरवः परिहरन्ति । यात्रार्थिनां द्वारा भाष्यरचनाविषयिणी वार्ता शीघ्रमेव समग्रदेशे साधकैः प्राप्ता। पार्श्वस्थग्रामेभ्यः पञ्चषाः जनाः सत्सङ्गार्थं सम्मिलिताः। शैत्यकालमपि अविगणय्य क्रमशः दूरप्रदेशेभ्यः अपि साधकाः आगन्तुम् आरभन्त। नूतनतया आगताः अपि भाष्यलेखनार्थम् उपविष्टवन्तः। अनेके तस्य प्रतिकृतीः कृत्वा स्थापितवन्तः। कतिपयदिनानन्तरम् अन्यस्मिन् समये भाष्यरचना, मध्याह्ने साधकेभ्यः भाष्यपाठनञ्च प्रचलति स्म। एतावत्पर्यन्तमपि ग्रहीतुम् असाध्यं वेदान्तम् अधुना साधकाः स्फुटतया अवगच्छन्तः सन्ति। तेषाम् आनन्दः वर्णनातीतः। तेषां मध्ये केवलम् एतद्विचारे चर्चा, अन्यः वार्तालापः नास्ति। क्रमेण व्यासगुहा व्यासाश्रमत्वेन परिणता।

एवं शान्त्या प्रतिदिनं प्रवर्तमानायाः दिनचर्यायाः विघ्नरूपेण, एकस्मिन् दिने अकस्मात् कोलाहलः अभवत्। प्रतिदिनम् इव शङ्करः प्रवचनम् आरभत। धृतकम्बलाः पञ्चषाः वृद्धाः तस्मिन् समये प्रतिदिनमपि आगच्छन्ति स्म। प्रायः कालयापनं कर्तुम् आगच्छन्तीति भावेन युवसाधकाः केऽपि तेषां विचारे अवधानं न प्रयच्छन्ति स्म। साधारणतया घण्टाद्वयं यावत् प्रवर्तमानं प्रवचनं तस्मिन् दिने अन्तिमघट्टे अस्ति। तावता एकः वृद्धः अकस्मादेव उच्चस्वरेण अवदत् : ‘रे! किं वदति रे? सर्वाण्यपि परस्परं विरुद्धवचनानि। एकवारं कर्म न त्यक्तव्यम् इति वदति, पुनः त्यजतु इति वदति, पुनः ज्ञानकर्मसमुच्चयः इति वदति; एकवारं जगत् सत्यम् इति वदति, पुनः असत्यम् इति वदति, पुनः मिथ्या इति वदति। भवतः वचनानां कोऽर्थः? भवता कथ्यमानानां परस्परविरुद्धवचनानां मितिरेव नास्ति खलु! भवान् ब्रह्मसूत्राणां भाष्यकर्ता, अङ्गुलपरिमाणकः अस्ति! भवान् शास्त्रं किं जानाति?’ इति लोहितनेत्राभ्यां सः शङ्करं कोपेन तदेकदृष्ट्या पश्यति स्म। औष्ठौ कम्पमानौ आस्ताम्। शरीरं वार्धक्ये अस्ति चेदपि कांस्यकण्ठे तु यौवनबलमासीत्। परिस्थितिं शमयितुम् अभिलष्य पृथ्वीधरः उत्थाय तत्समीपं गत्वा पार्श्वे उपविश्य मृदुतया तस्य भुजं स्पृष्ट्वा ‘पितृतुल्य! तथा कोलाहलः न करणीयः’ इत्यवदत्।

वृद्धः तस्मै कुपितः। ‘अहं तु तं बालकं पृच्छन् अस्मि, मध्ये प्रवेष्टुं भवान् कः? तूष्णीम् उपविशतु’ इति आक्रोशनम् अकरोत्! पृथ्वीधरेण शङ्करः दृष्टः। सः



MahaParivrajaka

प्रसन्नः अस्ति! पृथ्वीधरस्य बुद्धिः अतीव सूक्ष्मा। किमपि अनुक्त्वा प्रत्यावर्त्य सः स्वासने उपविष्टवान्। अनन्तरम् अनुद्विग्नतया शङ्करः अवदत् :

‘भगवन्, अहं बालकः। भवदीयं तु उद्दामपाण्डित्यम्। मया दोषपूर्णम् उक्तं चेत्, कृपया भवद्भिः परिमार्जनं करणीयम् इति प्रार्थये।’

‘परिमार्जनकार्यम् अनन्तरम्। आदौ पृष्टस्य उत्तरं ददातु, पश्याम।’

‘आरुरुक्षुः कर्म न त्यजेत्, आरूढः त्यजेत् इति भगवतः वचनमेव अवदम्। अपि च देवतोपासनायां ज्ञानकर्मसमुच्चयः अस्ति। अत्र देवतास्वरूपज्ञानमेव ज्ञानम्। किन्तु शास्त्रश्रवणं कृतवतः साधनचतुष्टयसम्पन्नस्य आत्मज्ञाननिष्ठामात्रं कर्तव्यम्। अस्मिन् ज्ञाने द्वैतं नास्तीत्यतः कर्मसम्बन्धः नास्ति इति भगवतः व्यासस्य वाणी। अपि च, जगत् स्वरूपदृष्ट्या ब्रह्म, इत्युक्ते पारमार्थिकं सत्यम्, व्यवहारदृष्ट्या असत्यम्, इत्युक्ते व्यावहारिकं सत्यम्; अपि च, अज्ञानिनां दृष्टौ विद्यमानम् अब्रह्मजगत् मिथ्या इति प्रोक्तम्। अस्मिन् दोषः अस्ति चेत् कृपया मां शिक्षयन्तु।’

‘तत् दुष्टं न। तत् भवतु नाम, जगत् अनिर्वचनीयम् इति उक्तवान् खलु, अस्य कः अर्थः?’

‘तदनन्यत्वमारम्भणशब्दादिभ्यः इत्यनेन ब्रह्मसूत्रेण जगत् ब्रह्मणः अनन्यम् इति निश्चितं भवति। किन्तु ब्रह्मणि अविद्यमानः व्यवहारः जगद्विकारे अस्ति। अतः जगतः विचारे जिज्ञासोः समकालं द्वे दृष्टी भवतः – परमार्थदृष्टिः व्यवहारदृष्टिश्च। अतः जगत्, ब्रह्म उत तद्भिन्नम् इति निस्सन्दिग्धतया वक्तुम् अशक्यम् अनिर्वचनीयम् इत्येव वक्तव्यं खलु?’

‘हुँ। तदपि समीचीनम्। अनन्तरं, जगतः निमित्तकारणं किमिति वदतु?’

‘ब्रह्म।’

‘प्रधानमेव निमित्तमपि किमर्थं न भवेत्?’

‘तत् जडम् इत्यतः सृष्टेः तस्मिन् प्रवृत्तिः भवितुं नार्हति।’

‘ब्रह्मणि अस्ति किम्?’

‘तस्मिन् अपि नास्ति।’

‘तर्हि सृष्टिः कथं भवेत्?’

‘ब्रह्मसंयुक्तया प्रकृत्या भवेत्।’

‘संयोगेऽस्मिन् दृश्यमाना प्रवृत्तिः ब्रह्मणः, उत प्रकृत्याः?’

‘प्रकृत्याः एव।’

‘तथा चेत् संयोगं किमर्थम् उक्तवान्?’

‘प्रवृत्तिः प्रकृत्याः चेदपि, सा प्रवृत्तिरहितेन ब्रह्मणा एव जायते; यतो हि, ब्रह्म अस्ति चेत् प्रवृत्तिः भवति, अन्यथा न।’

‘यदि अनेन संयोगेन ब्रह्म कारयितृ, तर्हि तस्य स्वरूपस्य भङ्गः अभवत् खलु?’

‘तथा नास्ति। अयस्कान्तं प्रवृत्तिरहितं चेदपि तस्य पार्श्वे विद्यमानः लोहः प्रवृत्तः भवतीति वयं पश्यामः।’

‘तत् भवतु। प्रथमसृष्टिः का?’

‘आकाशः।’

‘तत् एकं वस्तु कथं भवेत्? तत्तु आवरणाभावमात्रम्।’

‘तथा चेत्, तस्मिन् एकेन पक्षिणा आगते सति अयम् अभावः नश्येत्; अन्यस्य अवकाशः न स्यात्।’

‘यत्र अयं पक्षी नास्ति तत्र अन्येन पक्षिणा गन्तुं शक्यं खलु?’

‘तर्हि अन्यस्मै पक्षिणे अवकाशदाता आकाशः द्वितीयः आकाशः भवेत्।’

सभायां केचन स्वल्पं हसितवन्तः। पृथ्वीधरः गम्भीरमुखेन सभाम् अपश्यत्। पुनः मौनेन आवृतम्। वृद्धः अनुवर्तनं कृत्वा अवदत् : ‘उपनिषदां ज्ञानं भवतः कियदस्तीति अधुना पश्यामि। जीवः मरणसमये भाविनः देहस्य बीजानि सूक्ष्मभूतानि स्वेन सह एव नयति, उत न? वदतु।’

‘नयति।’

‘यत्र गम्यते तत्रैव प्राप्यन्ते खलु! किमर्थं नेतव्यानि?’

‘नयतीति श्रुतिवचनम्। पञ्चमाहुतौ, अप् पुरुषाकारं प्राप्नोतीति छान्दोग्यं वदति।’

‘तर्हि, देहे केवलम् अप् एव अस्ति वा?’

‘न। सर्वाणि भूतानि सन्ति।’

‘तत् कथं वदति?’

‘इदम् अप् त्रिवृत्कृतमस्ति।’

‘तानि किमर्थं नेतव्यानि?’

‘क्रियाशक्तिरूपस्य प्राणस्य वस्तुनः आश्रयं विना गमनम् असाध्यम्।’

‘प्राणानां गमनमेव नास्ति खलु! अग्निं वागप्येति वातं प्राणः – वाक् अग्निं, प्राणः वायुं च अधिगच्छति इति खलु उक्तं श्रुतौ?’

‘तत् गौणार्थे।’



‘तत् कथम्?’

‘श्रुतिः वनस्पतीन् केशाः – केशाः वृक्षान् अधिगच्छन्ति इत्यपि वदति। इदं प्रत्यक्षविरुद्धम्। अतः श्रुतेः प्रत्यक्षस्य च विरोधः यथा न स्यात् तथा वातः प्राणः इत्यत्र गौणार्थः स्वीकर्तव्यः।’

‘ब्रह्म सर्वरसं, सर्वगन्धम् इत्यादिना सविशेषमिति, अरसम्, अगन्धम् इत्यादिना निर्विशेषमिति च श्रुतिः वदति। अतः तत् उभयलिङ्गम्, उत न।’

‘न।’

‘किमर्थम्?’

‘एकमेव ब्रह्म सविशेषमपि अस्ति, निर्विशेषमपि अस्ति इति कथनं परस्पर-विरुद्धम्।’

‘तर्हि, श्रुतिम् आक्षिपति किम्?’

‘न। द्विविधानामपि वाक्यानां समन्वयनं कृत्वा अर्थः निश्चेतव्यः।’

‘कथं समन्वयनं करोति?’

‘निर्विशेषं स्वरूपं, सविशेषम् उपाधिसम्बन्धेन दृश्यमानम्।’

‘तत् सर्वरसमेव। अरसमिति उत्प्रेक्षा इति किं न वक्तव्यम्?’

‘श्रुतौ ब्रह्म अस्थूलम्, अनणु, अह्रस्वम्, अदीर्घम् इति च उक्तम्। उत्प्रेक्षा इति कथिते सति स्थूलत्वम्, अणुत्वं, ह्रस्वत्वं, दीर्घत्वम् इति च विरुद्धधर्माः ब्रह्मणि संलग्नाः एव भवन्ति।’

‘रसगन्धादयः वस्तुनः वा न?’

‘वस्तुनः।’

‘वस्तूनि नित्यानि इत्यतः उपाधिदृष्ट्या ब्रह्मणः सर्वरसत्वमपि नित्यमेव अभवत् खलु!’

‘नित्यमेव। किन्तु सत्यं न।’

‘सत्यम् इत्युक्ते किम्?’

‘कूटस्थनित्यम्।’

‘वस्तु नित्यमिति अङ्गीकृते सति ब्रह्मणः कूटस्थनित्यत्वं कथं सिद्ध्यति?’

‘विकारः स्वरूपात् भिन्नः न इति ज्ञानेन सिद्ध्यति।’

एभिः त्वरितगामिभिः प्रश्नोत्तरैः श्रोतारः दिङ्मूढाः अभवन्। तेषां मौनं गाढम् अभवत्। एनं वृद्धं बालकं च दृष्ट्वा सर्वे कम्पिताः। स्वस्य सर्वेषां प्रश्नानां समञ्जसानि

MahaParivrajaka

उत्तराणि श्रुत्वा कुपितः इव दृष्टः वृद्धः अवदत् : 'रे! अङ्गुलिप्रमाणक! अग्रिमेन प्रश्नेन भवान् कम्पते, पश्यतु' इति तस्मिन् वदति सत्येव अनुक्षणं शङ्करः उत्थाय नमस्कारप्रतीकरूपेण करौ संयोज्य अवदत् : 'भवन्तः प्रश्नं प्रष्टुम् अर्हन्ति।'

'उपविश्य एव भाषणं करोतु।'

'भवताम् आज्ञायाः उल्लङ्घनम् इति न मन्तव्यम्। मया एतावत्पर्यन्तम् उपविश्य भाषितमित्येव दोषाय। मया स्थित्वा एव भाषणीयम्। भवताम् अनुग्रहेण एव मम मुखात् उत्तराणि आगच्छेयुः।'

वृद्धस्य वचनम् ईषत् मृदु अभवत्! 'हे शङ्कर! इदमिदानीं ब्रह्म कूटस्थनित्यम् इति उक्तवान् खलु? तस्मात् जगत् कथं जायेत?'

'को अद्धा वेद क इह प्रCोचत् इयं विसृष्टिः यत आबभूव – इयं विविधा सृष्टिः केन जातेति को वा जानाति! को वा वक्तुं शक्नोति! इति श्रुतिः, न मे विदुस्सुरगणाःप्रभवं न महर्षयः – मम उत्पत्तिं देवताः महर्षयः वा न जानन्ति इति भगवतः वाक्यं च इदं वक्तुं न शक्यते इति वदति।'

'तर्हि ब्रह्मनिमित्तत्वं रक्षित्वा को अद्धा वेद इति श्रुतिः परित्यक्तव्या वा? अथवा इमां श्रुतिं रक्षित्वा ब्रह्मनिमित्तत्वम् अर्थवादः इति वक्तव्यं वा?'

'प्रथमपक्षे रक्षितस्य निमित्तत्वस्य स्वरूपं निश्चितं न भवति। द्वितीयपक्षे सृष्टेः समन्वयनं न भवति।'

'समन्वयनं कथं करोति?'

'निमित्तत्वम् अध्यारोपः चेत् समन्वयनं भवति।'

'अस्य अध्यारोपस्य स्वरूपं किम्?'

'प्रवृत्तिरहितं ब्रह्म जीवरूपेण अनुप्रविश्य सृष्टिं करोतीत्यतः जीवस्य निमित्तत्वस्य गौणार्थे ब्रह्मणि कथनम् अध्यारोपः।'

'अनुप्रवेशव्यवहारः कूटस्थब्रह्मणा कथं भवेत्?'

'सर्वत्र व्यापिकायाः ब्रह्मशक्तेः, जीवे जगति च व्यक्तीभवनमेव अनुप्रवेशः। सोऽपि अध्यारोपः एव।'

'उपादानत्वम् अध्यारोपः, उत न?'

'न।'

'कथम्?'

'उपादानत्वे उक्ते सत्येव ब्रह्मकूटस्थत्वं निश्चितं भवतीत्यतः सः अध्यारोपः न।'



कतिपयक्षणानां मौनम्। बालवृद्धौ परस्परं पश्यन्तौ स्तः। किमिदम्! अकस्मादेव भीषणं घनगर्जितं श्रुतम्! कर्णाः पिहिताः! कस्यापि किमपि न दृश्यते । सर्वे प्रज्ञाहीनाः सन्तः निश्चेष्टाः अभवन्। वृद्धः व्यासरूपं धृतवान्। झटित्येव स्वस्य स्थानात् धावित्वा शङ्करः तं साष्टाङ्गं नमस्कृतवान्। गृहीतौ पादौ बहुकालं यावत् न त्यक्तवान् एव। व्यासः एव तम् उत्थाप्य आलिङ्गितवान्।

'शङ्कर! भवतः शुकस्य च मध्ये भेदः नास्ति। मम गुहायाम् एव उषित्वा भवान् ब्रह्मसूत्राणां भाष्यं लिखन् अस्तीति श्रुत्वा अहं भवन्तं द्रष्टुमागतः। भवतः प्रवचनानि अश्रौषम्। अत्र भवदनुपस्थितौ भवतः भाष्यम् अपठम्। अथापि तृप्तिः न जाता। अतः भवन्तं परीक्षितुमेव वेषान्तरेण आगत्य प्रश्नान् अपृच्छम्। मध्ये भवान् उत्थाय यदि मह्यं नमस्कारं नाकरिष्यत्, तर्हि भवता प्राप्तानि उत्तराणि एव भवतः स्मरणे नागमिष्यन्। शङ्कर! भवतः सदाचारेण, पाण्डित्येन, सौजन्येन च अहम् अत्यन्तं तृप्तोऽस्मि। अधुना तु भवतः आयुषः समाप्तिसमयः। किन्तु भवता साधनीयानि महाकार्याणि बहूनि सन्ति। भवतः आयुः द्विगुणं भवतु इति आशीर्वादं करोमि। अत्रत्ये कार्ये सम्पत्स्यमाने सत्येव शीघ्रम् इतः प्रस्थानं करोतु। देशे सञ्चारं करोतु। धर्मरक्षणार्थं मूलशिलां निदधातु। युगप्रभाववशात् इतोऽपि त्रिचतुरवर्षाणि धर्मस्य ग्लानिरेव भवति। तां निवारयतु। अनन्तरं भवतः कार्यस्य आधारेण एव धर्मस्य पुनरुत्थानं भवति। भवान् तदर्थमेव अवतीर्णः परशिवः' इत्युक्त्वा अन्तर्हितः।

'अये! एकं वचनमपि वक्तुम् मम अवसरम् अदत्त्वा अदृश्यतां गतः खलु!' इति परितपन् शङ्करः स्तम्भीभूतः अतिष्ठत्। तत्र विद्यमानेषु आदौ जागरणं जातं पृथ्वीधरस्य सनन्दनस्य च । 'गुरुवर्य! किं जातम्? किं जातम्?' इति व्याकुलतया अपृच्छन्।

'जातं किम्! अहम् अत्र यदा प्राविशं तस्मात् दिनात् यस्य दर्शनार्थं नक्तन्दिवम् अभिलषन् आसन् सः व्यासः दर्शनभाग्यं कल्पयित्वा अनुग्रहमपि कृत्वा अदृश्यतां गतः। तेन सह मम भाषणात् पूर्वमेव अन्तर्हितः।'

'भवता सह वादं कृतवान् वृद्धः वेदव्यासः वा?'

'उपनिषद्भिः तस्य प्रश्नकरणेन सन्देहो जातः। अतः मया उपविश्य भाषणं न समीचीनमिति उत्थितवान्, तावता सः प्रस्थितः एव। मम भाग्यम् एतावदेव खलु! सर्वान् अपि प्रेषयताम्, भवन्तौ अपि बहिः गच्छताम्।' अनन्तरं जागरिताः अन्ये बहिर्गमनावसरे परस्परं भाषन्ते – 'सः वृद्धः व्यासः इति! सा दृढता अन्यस्य कस्य

Maha Parivrajaka

स्यात्! अहो! गुरवः महान्तः एव। तेषां शिष्यत्वेन वयं धन्याः!'

* * * * * * *

प्रस्थानत्रयस्य भाष्यरचनाकार्यं सम्पत्स्यमानम् अस्ति। अनध्ययनदिनानि विहाय साधकेभ्यः प्रतिदिनं भाष्यपाठनं प्रचलति। द्वयोः शिष्ययोः अपि विश्रान्तिरहितं कार्यम्। ब्रह्मदत्तस्य गृहे एव त्रयाणामपि भिक्षा भवति इति हेतोः भाष्यलेखनं, पाठनम्, अनुष्ठानं च विहाय अन्यत् व्यसनमेव नास्ति। ज्येष्ठात् कार्त्तिकं यावत् बदरीनाथं प्रति यात्रार्थिनः आगच्छन्ति। तस्मिन् समये पृथ्वीधरः तैः सह बहून् विचारान् चर्चयति। धर्मरक्षणार्थम् आस्थावन्तः साधकाः कुत्र कुत्र सन्तीति जानन् तैः सह सम्पर्कं रक्षति। एतदनुसृत्य, बदरीनाथात् काशीं प्रति प्रत्यावर्तनसमये शङ्करेण केन मार्गेण गम्यते चेत् उत्तमम् इति शङ्करं सूचयति।

एकस्मिन् दिने शङ्करः पृथ्वीधरम् अपृच्छत् : 'सनन्दनः भवतः शिष्यः इति श्रुतं मया। सत्यं किम्?'

'विद्यालये मत्तः किञ्चित् व्याकरणम् अधीतवान्।'

'भवान् ब्रह्मसूत्राणि पाठयति स्म इति श्रुतं, सत्यं वा?'

'आम्। मया एव लिखितं भाष्यं पाठयन् आसम्। भवतां दर्शनानन्तरं तत् गङ्गायां परित्यक्तवान्। अधुना अहं सनन्दनश्च उभावपि भवतां शिष्यौ।'

'सनन्दनाय संन्यासदीक्षा दातव्या इति चिन्तयामि।'

'उत्तमम्। सः सुयोग्यः बुद्धिमान् च। पूर्णतया विरक्तः। गुरुवर्याः! भवतां सकाशात् संन्यासदीक्षां प्राप्तुम् अहं प्रतीक्षमाणः अस्मि।'

'कालान्तरे भवतः अपि भवतु। मम ज्ञानानुसारम् अग्रिमदिनेषु भवता अधिकः भारः निर्वोढव्यः भवति। भवतः कार्यमपि अतीव भिन्नस्वरूपयुतं भवति।'

'शिरसा ऊढ्वा भवद्भिः उक्तं कार्यं करोमि। मम जीवनं भवद्भ्यः अर्पितम्।'

'पृथ्वीधर! मह्यं न। धर्मरक्षणाय अर्पितम् इति वदतु।'

एकस्मिन् शुभदिने सनन्दनः शङ्करात् संन्यासदीक्षां प्राप्य पद्मपादः अभवत्। प्रणवमन्त्रोपदेशानन्तरं गुरून् साष्टाङ्गं नमस्कृत्य अवदत् : 'भगवन्! अहं सदा निर्विघ्नतया ज्ञाननिष्ठायां भूत्वा अस्मिन् एव जन्मनि आत्मैकत्वविद्यां प्राप्नुयाम् इति माम् आशीर्भिः अनुगृह्णन्तु।'

'तथास्तु। अथापि धर्मरक्षणकार्यं न त्यक्तव्यम्।'



* * * * * * *

ब्रह्मदत्तस्य गृहे भिक्षानन्तरम् एकस्मिन् दिने शङ्करः अवदत् : 'अत्रागतस्य मम त्रीणि वर्षाणि अभवन्। उद्दिष्टं कार्यं निर्विघ्नतया परिसमाप्तम्। अस्मिन् भवतः पात्रं महत्। अधुना प्रतिगमनसमयः सन्निहितोऽस्ति। बदरीनाथस्य कृते मया का सेवा विधेया इति वदतु। करोमि।'

'गुरुवर्याः! भक्ताः मूर्तिरहितं रिक्तं पीठं नमस्कृत्य गच्छन्तः सन्ति। किं करणीयम् इति भवन्तः एव वदन्तु। वयं न जानीमः।'

'पुनःप्रतिष्ठापनेन भवितव्यं, तावदेव।'

'मूर्तिः?'

'नद्याम् अन्वेषणीयम्। प्राप्यते चेत् तस्याः स्थापनं, नो चेत् अन्यस्याः व्यवस्था करणीया।'

'अधुना प्रवाहः न्यूनः अस्ति। श्वः आरभ्य एव अन्वेषणम् आरभामहे।'

ब्रह्मदत्तः अनुपदमेव उत्तमान् तरणपटून् आहूतवान्। बहुधा अन्वेषणानन्तरं मूर्तिस्थानं ज्ञातम्। उपरि आनेतुं रज्ज्वा बद्ध्वा कर्षणं करणीयम्। तावत्कालं यावत् श्वासं स्तम्भयितुं शक्ताः तेषु केऽपि न आसन्। शङ्करः स्वयमेव प्रयते इत्युक्त्वा रज्जुं गृहीत्वा जले अवातरत्। बहुसमयं यावत् न आगतः। सर्वेषां हृदयं शब्दायते। ब्रह्मदत्तस्तु अतीव भीतः। अन्ते शङ्करः उपरि आगतः। जनाः निःश्वसितवन्तः। शङ्करस्य हस्ते मूर्त्याः छिन्नः एकः हस्तः आसीत्।

'मूर्तिः भिन्ना जाता खलु! स्थापनं कथम्?' इत्यवदत् ब्रह्मदत्तः।

'शिशूनां हस्तः भग्नः चेत् तान् न परित्यजामः खलु! तद्वदेव बदरीनाथोऽपि। स्थापयन्तु, चिन्ता नास्ति। मूर्तिः रज्ज्वा बद्धा अस्ति। शिलासु घट्टनं यथा न भवेत् तथा उपरि कर्षणं करणीयम्। अहं गत्वा यदा रज्जुं कम्पयामि तदा एव कर्षन्तु' इत्युक्त्वा शङ्करः पुनः जले अवातरत्। महता साहसेन मूर्त्याः उपरि कर्षणं जातम्। समवेताः जनाः बदरीनाथस्य शङ्करस्य च जयघोषम् अकुर्वन्। शङ्करः वैशाख-शुक्लपक्षे शुभमुहूर्तं निश्चितवान्। श्रीनगरात् पुरोहिताः आहूताः। वैभवेन प्रवृत्ते पुनःप्रतिष्ठापनामहोत्सवे जनानाम् उत्साहः अवर्णनीयः। किन्तु समीचीनतया पूजादीन् निर्वर्तयितुम् अर्चकाः न सन्तीति सर्वेषां दुःखम्। सद्यः भवन्तः एव केऽपि भवतां ज्ञानानुसारं पूजां कुर्वन्तु। कालान्तरे अहम् अर्चकान् प्रेषयिष्यामि' इत्यवदत् शङ्करः।

Mahaparivrajaka

तदनन्तरं द्वित्रदिनेषु पृथ्वीधरस्य व्यवस्थानुसारं नेपालस्य पशुपतिनाथं प्रति त्रयः अपि प्रयाणम् अकुर्वन्।

## ६. नेपालं प्रति

काश्यां विद्यालये आचार्यरूपेण आसीत् इत्यतः पृथ्वीधरस्य यात्रार्थिनां द्वारा समग्रे देशे परिचिताः आसन्। शङ्करस्य प्रयाणे निश्चिते सत्येव सः तत्सम्बद्धेभ्यः वार्तां प्रापयति स्म; इदमेव तस्य पर्यटनस्य महान् वरः अभवत्। मार्गे सर्वत्र जनाः तन्निमित्तं प्रतीक्षमाणाः भवन्ति स्म। सः स्तोत्राणि पाठयन्, धर्ममार्गे प्रवर्तितुं प्रेरयन्, विद्वद्भिः सह शास्त्रविचारान् चर्चयन् प्रयाणमकरोत्; सर्वेषां हृदयेषु च प्रविष्टः। वसत्यर्थं भिक्षार्थं वा कुत्रापि किमपि कष्टं न भवति स्म। कदाचित् पर्वतान् आरोहन्, कदाचित् अवरोहन् अन्ते एकस्मिन् दिने पशुपतिनाथं प्राप्नोत्। सम्मिलिताः जनाः तूर्याणि शङ्खान् पटहान् च वादयन्तः उत्साहेन स्वागतीकृतवन्तः। किन्तु मन्दिरं प्रविष्टः शङ्करः झटित्येव ततः बहिरागतः। पशुपतिनाथाय बलिरूपेण दत्तानां महिषाणां, मेषाणाम्, अजानां च रक्तेन न केवलं मन्दिरम्, अपि तु शिवलिङ्गमपि सिक्तम् आसीत्। शुनकाः लिङ्गं लेलिहानाः, निर्भीत्या भ्रमन्ति स्म। 'पुनः किञ्चित्समयानन्तरम् आगमिष्यामि' इत्युक्त्वा निश्चितं वसतिस्थानं प्रति अगच्छत्। तत्र समवेताः ग्रामस्य विद्वांसः, प्रमुखब्राह्मणाश्च 'न कर्मणा...' इति मन्त्रं पठित्वा नमस्कृतवन्तः।

मन्दिरे दृष्टं दृश्यम् उद्दिश्य शङ्करेण तेषां सकाशे पृष्टे सति तैः इत्थम् उक्तम् : 'वस्तुतः अधुना भवतां तत्र गमनस्य व्यवस्था नासीत्। उत्साहेन भवतः जनाः नीतवन्तः। क्षन्तव्याः वयम्। इदं देशे महत् यात्रास्थलम्। कदारभ्य मन्दिरे बलिदानपद्धतिः आरब्धा इति न ज्ञायते। बहुभ्यः दिनेभ्यः एवं प्रवर्तते। किन्तु केवलं शिवरात्रिदिने बलिः नास्ति। वयं गत्वा मन्दिरं प्रक्षाल्य, पुण्याहं रक्षोघ्नं च कृत्वा रुद्राभिषेकं कृत्वा आगच्छामः।' अनन्तरं पृथ्वीधरः सभामुद्दिश्य 'गुरवः कतिपयदिनानि यावत् अत्र निवसन्ति। प्रातः मध्याह्ने च विदुषां गोष्ठ्यः, सायं सार्वजनिकभाषणस्य च व्यवस्था क्रियते चेत् उत्तमम्। तैः उक्तरीत्या व्यवहृत्य अनुग्रहपात्राणि भवन्ति चेत् वैयक्तिकरूपेण ग्रामस्य च महत् श्रेयः भवति' इत्यवदत्। अग्रिमदिनात् आरभ्य सा दिनचरी आरब्धा। द्वित्रेषु दिनेषु एव शङ्करस्य व्यक्तित्वस्य ज्ञानम् अभवत्,



ManaPaijaka

विद्वांसः प्रस्थानत्रयभाष्यस्य प्रतिकृतिं कृत्वा स्थापितवन्तः। विदुषां कृते भाष्यस्थानां प्रमुखविचाराणां प्रवचनं, सामान्यजनानां कृते स्तोत्रपाठनं शिवपुराणस्य प्रवचनं च शङ्करेण आरब्धः। विवरणानि श्रुत्वा नेपालस्य महाराजः शङ्करं द्रष्टुम् आगतः। शङ्करः राजपरिवारस्य प्रजानां च योगक्षेमं विचारितवान्; तेन प्रभावितः महाराजः मार्गदर्शनार्थं बहुवारम् आगत्य गतः।

एकस्मिन् दिने माध्याह्निक्यां गोष्ठ्याम् कश्चन विद्वान् एकं प्रश्नम् अपृच्छत्; 'ह्यः भवतां सकाशात् अवस्थात्रयविमर्शं श्रुतवन्तः। सुषुप्तौ बाह्यविषयाणां सम्पर्कः न भवति चेदपि कथं सुखानुभवः भवति इति विचारः न ज्ञातः।'

'सुषुप्तौ बुद्ध्यादिकरणानि न भवन्तीत्यतः बाह्यप्रज्ञाः अपि न भवन्ति, अन्तःप्रज्ञाः अपि न भवन्ति; इत्युक्ते जाग्रत्स्वप्नयोः विद्यमानः 'अहं' नास्ति इत्यर्थः। किन्तु अहमेव नास्तीति न। अहमेव न भवति चेत् आनन्दानुभवः कस्य स्यात्? एवं तत्र अहम् अस्ति चेदपि तत्रत्यः अहं कः इति न ज्ञायते। इयमेव स्वविचारे विद्यमाना अविद्या। तत्र अहं कः? मम किं जातमासीत्? इति प्रश्नानां श्रुत्या कथ्यमानम् उत्तरम् इदम् : सता तदा सम्पन्नो भवति – सद्ब्रह्मणि तदा लीनः भवति। अपि च आनन्दः ब्रह्मणःस्वरूपम् इत्यतः स्वयमपि तम् आनन्दम् अनुभवति।'

'सद्ब्रह्मणि लीनः भवति इत्युक्ते कथम्?'

'पश्यन्तु, सत्यं, ज्ञानम्, अनन्तत्वम्, आनन्दः च सद्ब्रह्मणः लक्षणानि। सुषुप्तौ सिद्धे प्रत्यगात्मनि स्वस्मिन् अपि एतान्येव लक्षणानि सन्ति। अतः तदा स्वेन ब्रह्मणि लीनेन जातं स्यात्।'

'अहो! तर्हि तत्त्वमसि इति वाक्ये विद्यमानः 'त्वम्' अयं प्रत्यगात्मा किम्?'

'आम्।'

'हन्त! त्वम् इत्युक्ते बहिष्प्रज्ञः इति मत्वा तत्त्वमसि इति किम् इति ज्ञातुम् अशक्ताः वयं शिरः घट्टयन्तः आस्म। भवद्भिः बहूपकृतम्।'

'त्वम् इत्युक्ते बहिष्प्रज्ञः न इति इत्थमपि पश्यन्तु; 'क्षेत्रज्ञं चापि मां विद्धि' इति खलु भगवतः उपदेशः? क्षेत्रज्ञः इत्युक्ते क्षेत्रस्य ज्ञाता। अयं क्षेत्रात् भिन्नः एव स्यात्; अन्यथा क्षेत्रस्य ज्ञानम् असाध्यम्। अपि च क्षेत्रे स्थूलसूक्ष्मरूपम् उभयमपि शरीरम् अन्तर्भूतमस्ति। जाग्रत्स्वप्नयोः बहिष्प्रज्ञान्तःप्रज्ञौ एताभ्यां शरीराभ्यां सह सम्बन्धं रक्षतः। अतः तेषां क्षेत्रज्ञीभवनम् असाध्यम्। सुषुप्तात्मा प्राज्ञः स्पष्टतया उभाभ्यां शरीराभ्याम् अपि भिन्नः एव अस्ति। अतः क्षेत्रज्ञः इत्युक्ते प्राज्ञः एव

स्यात्।'

अन्यः विद्वान् अपृच्छत् : 'तर्हि बहिष्प्रज्ञः अन्तःप्रज्ञश्च ब्रह्म न वा?'

'अब्रह्म न किमपि अस्ति। तौ उभावपि ब्रह्म एव चेदपि बहिष्प्रज्ञत्वम् अन्तःप्रज्ञत्वं वा ब्रह्मणः स्वरूपं न; बुद्ध्याद्युपाधीनां द्वारा दृश्यमानं रूपम्।'

'स्वरूपस्य रूपस्य च कः भेदः?'

'स्वस्मात् भिन्नम्, अन्यत् किमपि नाभिलष्य दृश्यमानं वस्तुनः रूपं स्वरूपम्; अन्यत् अभिलष्य दृश्यमानं रूपम्।'

* * * * * * *

अन्यस्मिन् दिने पाशुपतमतस्थस्य प्रश्नः इत्थमासीत् : 'जगत् जीवेभ्यः सृष्टम्। पशुपतिनाथः ईश्वरः जगन्निमित्तकारणं तथा प्रधानम् उपादानम् इति वयं विश्वसिमः। किन्तु भवद्भिः उच्यमानम् एतस्मात् भिन्नमस्ति। अस्माभिः विश्वसिते को दोषः इति कृपया वदन्ति वा?'

'ईश्वरः निमित्तकारणम् इति न दोषाय। किन्तु निमित्तमात्रं, प्रधानपुरुषौ च परस्परं भिन्नौ, ईश्वरादपि भिन्नाः इति न समीचीनम्।'

'किमर्थम्?'

'भवतां विश्वासे त्रयः अपि सर्वगताः, निरवयवाश्च सन्ति खलु?'

'आम्।'

'तर्हि प्रधानस्य ईश्वरस्य च संयोगः न जायते। अतः सृष्टिरेव न भवेत्। तदा ईश्वरस्य प्रधानपुरुषयोरुपरि प्रभुत्वम् असाध्यम्।'

'समवायसम्बन्धश्चेत्?'

'समवाये एकः आश्रयः, अपरः आश्रयी। प्रधानपुरुषेश्वराः स्वतन्त्राः चेत्, कः आश्रयः कः आश्रयी इति च निर्णीतं न भवति।'

'प्रधानः ईश्वरशक्तिः इत्युक्त्वा संयोगसम्बन्धः उक्तश्चेत्?'

'शक्तिशक्तौ भिन्नौ चेत् वक्तुं शक्यमासीत्। किन्तु शक्तिशक्तयोः तादात्म्यसम्बन्धः प्रत्यक्षः अस्ति। अतः पशुपतिनाथः जगतः निमित्तमपि अस्ति, उपादानं च अस्ति इति उक्तं चेत् कोऽपि दोषः न भवति।'

* * * * * * *



परेद्यवि पृथ्वीधरः 'अहं दिनद्वयं न भवामि। कमपि विद्वांसं द्रष्टुम् ईषद्दूरस्थं ग्रामं प्रति गन्तव्यमस्ति। पद्मपादवर्य! गुरूणां विचारे अवधानं प्रयच्छतु' इत्युक्त्वा प्रस्थितवान्। परेद्यवि शङ्करः 'पद्मपादवर्य! अयमेकः सौगतः लघुग्रन्थः अस्ति। अस्य प्रतिकृतिं कृत्वा स्थापयतु। अहम् अत्रैव किञ्चित् भ्रमणं कृत्वा आगमिष्यामि' इत्युक्त्वा प्रस्थितवान्। पर्वतप्रदेशेषु अरण्ये सञ्चरतः तस्य तत्र मार्गच्युतिः सञ्जाता। मध्याह्नः अभवत्। शङ्करः अरण्यम् अतीत्य समतलप्रदेशं प्रति आगतः। भिक्षा नास्ति, आतपे अटनम्। पातुं जलमपि न प्राप्तम्। श्रान्त्या अधः अपतत्। स्वल्प-समयानन्तरं चत्वारिंशद्वर्षदेशीया काचित् स्त्री घटे जलं गृहीत्वा गच्छन्ती दृष्टा। शङ्करः क्षीणेन ध्वनिना उक्तवान् - 'अम्ब! पातुं किञ्चित् जलं ददातु।'

सा अनुक्षणं तत्रैव स्थित्वा, घटं भूमौ संस्थाप्य कट्यां करद्वयं निधाय हसन्ती 'किम्?' इत्यवदत्।

'अम्ब, किञ्चित् जलं ददातु।'

'किमर्थम्?'

'पातुम्।'

'घटम् अत्र स्थापितवती अस्मि। भवानेव आगत्य स्वीकरोतु।'

'अम्ब, मम शक्तिः विनष्टा, चलितुं न शक्नोमि। कृपया भवती एव आनीय ददातु।'

'शक्तिः विनष्टा इत्युक्ते कः अर्थः? सद्यः एव शक्तिशक्तिमतोः अनन्यत्वम् इति वदन् आसीत् खलु? भवतः शक्तिः भवन्तं त्यक्त्वा कथं गच्छेत्? भवान् एव उत्थाय आगत्य पिबतु।'

'आदौ जलं ददातु अम्ब, वादः अनन्तरं भवतु।'

'भवता उक्तम् असाधु इति अङ्गीकृतं चेत् अहम् आनीय ददामि। साधु इति चेत् भवान् एव उत्थाय आगत्य पिबतु।'

'मया उक्तम् असाधु इति वदामि। जलम् आनीय ददातु, पानानन्तरं मया उक्तं साधु इति दर्शयिष्यामि। संन्यासिना सता उक्तस्य असत्यस्य भवत्या दत्तस्य जलस्य पानमेव प्रायश्चित्तम्।'

'हे पुत्र, भवतः उद्बोधनम् अश्रौषम्। चेष्टां कर्तुम् अभिलाषः अभवत्। अतः इमां क्रीडां क्रीडितवती। भवान् प्रचण्डः। अनन्तरं किं वदिष्यति इति अहम् अधुनैव जानामि। जलम् अहमेव ददामि' इत्युक्त्वा सा तस्मै जलं प्रायच्छत्। शङ्करेण जले

MahaParivrajaka

पीते सत्येव 'सर्वत्र यशस्वी भव' इत्युक्त्वा कुत्रचित् अगच्छत् च।

वसतिस्थानं प्रति गमनानुक्षणं पद्मपादः अपृच्छत् – 'गुरुवर्याः, कियत्कालं यावत् गतवन्तः। भिक्षा?'

'भवान् स्वीकरोतु। मम उदरं पूर्णमस्ति। किमपि मास्तु' इत्युक्त्वा स्वप्रकोष्ठं गत्वा उपविश्य ध्यानमग्नः अभवत् शङ्करः।

* * * * * * *

एकदा महाराजः शिष्यसमेतं शङ्करं भिक्षार्थम् आहूतवान्। 'मम इच्छां पूरयति चेत् वयं त्रयः अपि आगमिष्यामः' इत्यवदत् शङ्करः।

'अस्माकं श्रेयोऽर्थमेव भवत्सु इच्छा जायते खलु! अवश्यं पूरयामि। किं वदन्तु।'

'पशुपतिनाथमन्दिरे बहूनि परिवर्तनानि करणीयानि।'

'भवद्भिः उक्तरीत्या एव भवतु, कानि परिवर्तनानि करणीयानि इति सूचयन्तु।'

'तत्र पशुबलिः न भवेत्। वैदिकविधिना पूजाः भवेयुः। इदं शासनेन एव साध्यम्।'

'बुद्धस्य प्रभावेण अत्र वैदिकपरम्परा क्षीणा जातास्ति। अत्र केवलं शिवरात्रिदिने रुद्राभिषेकं कर्तुं शक्ताः सन्ति, उत्तमविद्वांसः न सन्ति। वैदिकपूजायाः व्यवस्थाकरणं कथम्?'

'सद्यः ते एव पूजां कुर्वन्तु। कालान्तरे अहं विदुषः अर्चकान् प्रेषयिष्यामि।'

'तर्हि अवश्यं भवतु।'

प्रासादे भिक्षा अभवत्। वसतिस्थानं प्रति प्रत्यावर्तनानन्तरं शङ्करः पृथ्वीधरेण सह दीर्घसमालोचनम् अकरोत्। 'मन्दिरं शुद्धीकृत्य कुम्भाभिषेककर्तारः के सन्ति?' इत्यपृच्छत्।

'समीपे केऽपि न सन्ति; सर्वोऽपि बुद्धस्य प्रभावः! भवन्तः अङ्गीकुर्वन्ति चेत् भवतां मार्गदर्शनेन अहं तत् कार्यं निर्वहामि।'

'तथास्तु।'

महाराजस्य आज्ञानुसारेण मन्दिरस्य पुनरुज्जीवनव्यवस्था कृता। ग्रामाधिकारिणां द्वारा एव जनेभ्यः सूचनाः गताः। सामान्यरूपेण वेदम् अधीतवन्तः सर्वेऽपि ब्राह्मणाः सप्ताहात् पूर्वम् आगताः। ते ज्ञातान् मन्त्रान् एककण्ठेन वदन्तः किञ्चित् अभ्यासम् अकुर्वन्। पृथ्वीधरः एकैकस्यापि एकं निश्चितं दायित्वं प्रायच्छत्। त्रयाणां दिनानां



कार्यक्रमः शास्त्रोक्तरूपेण प्रवृत्तः। अन्तिमदिने कुम्भाभिषेकः। शङ्करः कलशोदकेन पशुपतिनाथस्य अभिषेकम् अकरोत्। तावत्पर्यन्तमपि न केनापि अदृष्टपूर्वया रीत्या वेदघोषः, हवनानि च प्रवृत्तानि। पद्मपादः अमोघरूपेण सामगानम् अकरोत्। वाद्यवृन्दानां क्वणनं श्रुतम्। ग्रामस्थानां पटहाः, तूर्याणि च तैः सह अस्पर्धन्त। सहस्रशः जनानां भूरिभोजनमभवत्। बहोः कालात् एतादृशम् अद्भुतं वैदिकं कार्यक्रमं जनाः न दृष्टवन्तः आसन्। सुव्यवस्थितरूपेण कृतां व्यवस्थां दृष्ट्वा महाराजः प्रजाः चेति सर्वे पृथ्वीधरस्य प्रशंसाम् अकुर्वन्। महाराजः 'मां शिष्यरूपेण स्वीकरोतु इति शङ्करं प्रार्थयत। परेद्यवि तस्य मन्त्रोपदेशः जातः। द्वित्राणां दिनानाम् अनन्तरं शङ्करपरिवारः पशुपतिनाथात् काशीं प्रति प्रयाणम् अकरोत्।

## ७. पुनः काशीं प्रति

पशुपतिनाथे यदा आसीत् तदा एव यात्रार्थिनां सकाशे 'ततः काशीं गन्तुं समीपतमः मार्गः कः? मार्गे स्थितानि यात्रास्थलानि कानि? पूजा स्थगिता इति स्थितौ विद्यमानानि मन्दिराणि कुत्र कुत्र सन्ति? विद्वांसः कुत्र सन्ति?' इति सर्वं विचार्य तदनुसारं पृथ्वीधरः काशीप्रयाणार्थं मार्गं निश्चितवान्। यत्र यत्र शक्यं तत्र सर्वत्र वार्तां पूर्वमेव प्रापयति स्म। मार्गे सर्वत्र पण्डितैः सह वेदान्तमीमांसाशास्त्रचर्चा, वैदिकवृत्तौ विद्यमानेभ्यः अधिकवेदाध्ययनार्थं प्रेरणा, देवालयानाम् अभिवृद्धिः, सामान्येभ्यः स्तोत्रपाठनम्, रामायणमहाभारतपुराणप्रवचनानि वा प्रचलन्ति स्म। निश्चिते मार्गे उभयोः भागयोः सज्जनानाम् आग्रहानुसारं तेषां ग्रामं प्रत्यपि गमनं भवति स्म इति कारणेन प्रयाणं विलम्बेन अपि भवति स्म। अथापि किम्! सर्वैः प्राप्तव्यः सन्देशः प्राप्यते स्म। सञ्चारस्य उद्देशः एव सः खलु!

एकदा पद्मपादः 'गुरुवर्याः! इतः होराद्वययाप्ये दूरे विद्यमाने नरसिंहपुरे नरसिंहस्वामिनः मन्दिरम् अस्ति इति श्रुतम्। भवतां सम्मतिरस्ति चेत् दर्शनं कृत्वा आगमिष्यामि' इत्यवदत्।

'प्रतिनिवर्तनं कदा?'

'श्वः सायङ्काले आगमिष्यामि।'

'गच्छतु पुनर्दर्शनाय।'

MahaParivrajaka

मन्दिरं प्राप्तः पद्मपादः स्वामिनः पुरस्तात् आत्मानं विस्मृत्य उपविष्टः। जपं ध्यानं च समाप्य प्रस्थातुं यदा सज्जः अभवत् तदा अर्चकः अवदत् 'स्वामिन्, श्वः नरसिंहजयन्ती। ग्रामस्थाः सर्वे उत्सवमाचरन्ति। भोजनमस्ति । तत् परिसमाप्य मध्याह्नानन्तरं प्रस्थातुं शक्यं खलु?' नरसिंहजयन्तीदिने एव तत्र स्थातुम् अवसरः प्राप्तः इति पद्मपादः अतीव हर्षेण अङ्गीकृतवान्।

'भवन्तः एव पूजां कुर्वन्ति चेत् इतोऽपि सन्तोषः' इति अर्चकः अवदत्। 'अहो! मे भाग्यम्। मम आराध्यस्वामिनः पूजार्थमपि अवसरं कल्पितवान् खलु!' इति पद्मपादः भावपरवशतया अनुक्षणमेव अङ्गीकृतवान्। परेद्यवि तदेकचित्ततया पूजाम् अकरोत्। अन्ते तेनैव सामगानं कृतम्। तद्ग्रामस्थाः सामगानं कदापि न श्रुतवन्तः आसन्। ते अतीव सन्तोषम् अनुभूतवन्तः। कतिपयदिनानि अत्रैव तिष्ठतु' इति जनाः अनुरोधम् अकुर्वन्। 'क्षाम्यन्तु, सायङ्कालाभ्यन्तरे आगमिष्यामि इति गुरूणां सकाशे उक्त्वा आगतवानस्मि। गन्तव्यमेव।'

अर्चकः नैवेद्यार्थं सज्जीकृतानि विविधानि लड्डुकानि, शष्कुलीः च एकस्मिन् बृहति स्यूते प्रपूर्य दत्तवान्। प्रत्यागतस्य पद्मपादस्य बृहत् स्यूतं दृष्ट्वा शङ्करः 'किमिदम्?' इत्यपृच्छत्। पद्मपादः तत्र प्रवृत्तं सर्वं विस्तरेण प्रोक्तवान्। स्यूतम् उद्घाट्य दृष्ट्वा शङ्करः, 'इतःपरम् सप्ताहं यावत् अस्माभिः कैरपि भिक्षार्थं गन्तव्यमिति नास्ति। तावदस्ति' इति विनोदं कृत्वा तत्र विद्यमानेभ्यः सर्वेभ्यः जनेभ्यः प्रसादं वितीर्णवान्। स्वयमपि स्वीकृतवान्। स्यूतः रिक्तः अभवत्।

काशीं प्राप्तुं प्रायः त्रिंशत् दिनानि यावत् प्रयाणं करणीयम् अभवत्। तेषु काशीं प्राप्तवत्सु शङ्करस्य दर्शनार्थं जनाः समूहशः आगताः। तेन भाष्यं रचितम् इति वार्ता विद्वद्भिः एतावता एव ज्ञाता आसीत्। बहवः विद्वांसः प्रतिकृतिं कृतवन्तः। 'स्वल्पसमयं यावत् अत्रैव स्थित्वा सूत्रभाष्यपाठनं कर्तुं गुरवः यथा अङ्गीकुर्युः तथा कुर्वन्तु' इति विद्वांसः पृथ्वीधरं, विद्यार्थिनः पद्मपादं च प्रार्थितवन्तः। गुरुषु तन्निवेदने कृते सति, 'वयमत्र भाष्यपाठनस्य पूर्णसमयं यावत् न भवामः। ते अधुना एव भाष्यं पठन्तः सन्तीत्यतः तैः प्रश्नकरणमेव उत्तमम्' इत्यवदन् गुरवः। मध्याह्ने विद्वद्भिः सह प्रश्नोत्तरसभा, सायङ्काले जनसामान्येभ्यः उद्बोधनं च आरब्धम्।

एकस्मिन् मध्याह्ने एकः विद्वान् अवदत् : 'तत्त्वमसि वाक्यस्य विचारे बहवः सन्देहाः सन्ति। संक्षेपरूपेण भवन्तः तस्य तात्पर्यं सूचयन्ति चेत्, अनन्तरं मदीयान् सन्देहान् पृच्छामि।'



MahaParivrajaka

'अस्मिन् वाक्ये तत् इत्युक्ते सत्यं ज्ञानम् अनन्तं ब्रह्म। ब्रह्म जगतः उपादानमित्यतः जगतः असत्यत्वजडत्वपरिच्छिन्नत्वानि निर्लक्ष्य, तस्मिन् एव अन्तर्गतं ब्रह्म लक्ष्ये स्वीकर्तव्यम्। त्वम् इत्युक्ते प्रत्यगात्मा, क्षेत्रज्ञः, सुषुप्तौ सिद्धत्वं प्राप्नुवन् निरुपाधिकः प्राज्ञः। जगत् अलक्ष्यीकृत्य तस्मिन् एव अन्तर्भूतस्य ब्रह्मणः अवधानमिव, स्वस्मिन् अपि, जाग्रत्स्वप्नयोः दृश्यमानाध्यस्तधर्मान् अनवधाय अनध्यस्तः सुषुप्तात्मा अवधीयते चेत् ब्रह्मलक्षणानि तस्मिन् दृश्यन्ते। तस्य निदिध्यासनेन ब्रह्म स्वयमेव इति ज्ञायते।'

'अस्य ब्रह्मात्मैकत्वस्य अनुभववेद्यत्वं साध्यं किम्?'

'सुषुप्तेः परिशीलनेन ब्रह्मात्मैकत्वम् एतावता एव ज्ञातः विचारः। किन्तु अनादिना अध्यासबलेन जाग्रदवस्थायाम् अस्मिन् भावे भवनं कष्टतया परिणमति। अतः साधनसम्पत्तिरहितेभ्यः इदम् असाध्यम् इति शास्त्रं सूचयति।'

'योगाभ्यासेन सुषुप्तौ भवनमिव, चित्तवृत्तिनिरोधेन शक्यं किम्?'

'न। चित्तवृत्तिनिरोधे कर्तृत्वमस्ति; ब्रह्मात्मैकत्वे नास्ति।'

'तत्त्वमसि वाक्यस्य जपकरणेन शक्यं किम्?'

'न। जपेन कर्तृत्वम् इतोऽपि दृढं भवति, त्यक्त्वा न गच्छति। बुद्धेः आत्मनि स्थानरूपं निदिध्यासनम् एकमेव अस्य साधनम्।'

'एतेनापि चित्तवृत्तिनिरोधः एव भवति खलु?'

'आम्। चित्तवृत्तिनिरोधः आत्मचित्तस्य फलं, न तु आत्मानुभवसाधनम्।'

'अयम् अनुभवः एकः विशिष्टः अवस्थाविशेषः किम्?'

'न। यथा अहं पुरुषः इति भावः वयोवस्थाम् अतीत्य तिष्ठति, तथा आत्मानुभवः सर्वावस्थातिरिक्तः।'

'मम प्रश्नः अयम्; केवलं चित्तवृत्तिनिरोधे जाते सत्येव ब्रह्मात्मैकत्वं वा?'

'न, न। चित्तवृत्तिनिरोधः अपि काचित् अवस्था एव। सः क्षेत्रधर्मः। आत्मनः तस्य च सम्बन्धः एव नास्ति। एकत्वानुभवस्य फलं केवलम् अध्यासनाशः, अन्यत् किमपि नास्ति।'

'पश्यन्तु, ब्रह्म जगतः उपादानमित्यतः सर्वमपि ब्रह्म एव। इदं ब्रह्म अहम् इत्यनेन, सर्वस्वमपि अहमेव। अयमेव सर्वात्मभावः। एतस्यानन्तरं जगता सह भेदबुद्धिः न भवति।'

* * * * * * *

अन्यस्य प्रश्नः : 'भवदीयं भाष्यम् अधीयानाः स्मः। तत्र कुत्रचित् माया ब्रह्मणः उपाधिः इति, कुत्रचित् ब्रह्म एव इति, कुत्रचित् ब्रह्म वा ब्रह्मणः भिन्ना वा इति निरूपयितुं न शक्यते इत्यतः अनिर्वचनीया इति च निरूपितम् अस्ति। एतत् परस्परं विरुद्धं दृश्यते। अस्य समन्वयनं कथम्?'

'दृष्टायाः मायायाः द्वारा अदृष्टं ब्रह्म त्रिषु स्तरेषु निरूपितमस्ति। प्रथमस्तरे अज्ञानिनः ज्ञानम् अनुसृत्य ब्रह्मणः उपाधिः इति प्रोक्तम्। द्वितीयस्तरे शक्तिशक्तयोः अनन्यत्वेन सा ब्रह्म एव इति प्रोक्तम्। किन्तु ब्रह्मणि व्यवहारः नास्ति, मायायाम् अस्ति। अतः माया ब्रह्म वा? ब्रह्मणः भिन्ना वा? इति संशयः जायते। जिज्ञासोः अयं संशयः एव अनिर्वचनीयत्वस्य विषयः; इत्युक्ते, मायायाः उपाधित्वानिर्वचनीयत्वे जिज्ञासोः बुद्धिम् अनुसृत्य प्रोक्ते। अपि च, सा ब्रह्म एव इति तस्य स्वरूपनिर्णयः। नामरूपाणां विचारेऽपि एवमेव।'

* * * * * * *

अपरस्य प्रश्नः : 'भाष्ये केषुचित् स्थलेषु ब्रह्म केवलं श्रुत्या एव ज्ञातुं शक्यम् इति प्रोक्तम्; केषुचित् स्थलेषु, श्रुतिभिन्नैः इतरप्रमाणैः आश्रितेन तर्कस्य साहाय्येन ज्ञातुं शक्यम् इति प्रोक्तम्। कृपया स्पष्टीकुर्वन्ति वा?'

'पश्यन्तु, प्रमेयाः द्विविधाः, इन्द्रियवेद्याः, इन्द्रियातीताः चेति । प्रत्यक्षानुमानोप–मानार्थापत्त्यागमाः पञ्च प्रमाणानि। इन्द्रियवेद्यप्रमेयाः आदिमानां चतुर्णां प्रमाणानाम्, इन्द्रियातीताः आगमस्य च विषयाः। धर्माधर्मप्रकृत्यतीताः विषयाः आगममात्रवेद्याः। एवं चेदपि जीवानाम् अभ्युदयार्थं विद्यमानः धर्मः प्रत्यक्षविषयान् आश्रित्य विद्यते। अतः अस्य जिज्ञासायाम् आगमः इतरप्रमाणानां विरुद्धः इति कथनम् असाध्यम्। एतावत् कर्मकाण्डम् अभवत्। किन्तु ब्रह्म प्रकृत्यतीतम् इत्यतः तस्य जिज्ञासायाम् इतरप्रमाणानां स्थानं न स्यात् खलु? इति प्रश्नः ज्ञानकाण्डे सञ्जायते। ब्रह्म प्रकृत्यतीतं चेदपि, तत् जगतः द्वारा एव ज्ञातव्यम्। अतः ब्रह्मज्ञानं यावत् इतरप्रमाणानि आवश्यकानि; अस्मिन् स्तरे श्रुतेः इतरप्रमाणवैरुद्ध्यं वक्तुं न शक्यते। किन्तु ब्रह्मणः अभिज्ञानानन्तरं, निरुपाधिकब्रह्मणः कथनावसरे अन्यप्रमाणानां स्थानमेव नास्ति; श्रुतिः एकमेव प्रमाणम्।'



Maha Parivrajaka

'अस्मिन् स्तरे श्रुतिप्रामाण्यं कथं सिद्ध्यति?'

'निदिध्यासनानन्तरं जायमानेन अनुभवेन सिद्ध्यति। एवं दृष्टे सति, सर्वेषां प्रमाणानां प्रामाण्यमपि अनुभवेन एव सिद्ध्यति। श्रुतिविषये केवलं विद्यमानः अपवादः – स्वर्गादिलोकाः!'

* * * * * * *

एकदा पद्मपादपृथ्वीधरौ शिष्यौ यदा उपविष्टौ आस्तां तदा शङ्करः एकं प्रश्नम् अपृच्छत्: 'मुमुक्षवः पर्वतान् अरण्यानि च आश्रयन्ति। अत्र किं कारणम्?'

'तत्र शान्तिः अस्ति इति आश्रयन्ति।'

'मुमुक्षूणां शान्त्याः आवश्यकता का?'

'तां विना आत्मचिन्तनं न साध्यम्।'

'ग्रामेषु शान्तिः किमर्थं न भवति?'

'तत्र स्वभावतः एव रागद्वेषौ भवतः। अतः शान्तिः न भवति।'

'रागद्वेषरहितानाम्, अग्रे ये मुमुक्षवः भवन्ति तेषाम् अमुमुक्षूणां शान्त्याः आवश्यकता नास्ति वा?'

'अस्ति।'

'आत्मचिन्तनार्थं शान्तिः स्यात्। सामान्यसज्जनानां शान्तिः नापेक्षिता किम्?'

'तेषामपि अपेक्षिता, किन्तु आत्मचिन्तनाय गाढशान्तिः अपेक्ष्यते।'

'शान्त्यर्थं सामान्यसज्जनाः कुत्र गच्छेयुः?'

किञ्चित्कालं तूष्णीं भूत्वा अनन्तरं पृथ्वीधरः अवदत् : किं वा, न ज्ञायते।'

'वदामि, श्रूयताम्' इति शङ्करः आरभत। 'ओङ्कारेश्वरं त्यक्त्वा, अनन्तरं गुरूणाम् आज्ञानुसारं गुर्जरदेशम् अगच्छम्। रागद्वेषरहिताः अस्मदीयाः नैके सिन्धुदेशात् स्थानान्तरिताः सन्तः आगत्य तत्र उषितवन्तः इति तत्र ज्ञातवान्।'

'किमर्थं स्थानान्तरणं कृत्वा आगताः?'

'सिन्धुदेशे म्लेच्छानाम् आक्रमणम् अभवत्। तेषाम् उपद्रवे स्वधर्मपरिपालनं शक्यं नासीत्। अतः आगतवन्तः।'

'तत्रत्याः राजानः किं कुर्वन्ति स्म?'

'युद्धं कृतवन्तः चेदपि यशः अप्राप्य रणरङ्गे एव मृताः।'

'अयशसि किं कारणम्?'

'अस्मदीयाः एव बौद्धाः आक्रमणकारेभ्यः म्लेच्छेभ्यः साहाय्यम् अकुर्वन्।'

'भगवन् परमेश्वर!' इति क्रन्दनमकरोत् पृथ्वीधरः, नेत्रे प्रोन्मील्य शृण्वन् आसीत् पद्मपादः।

'गुरुवर्याः, प्रवृत्तं किमिति वदन्तु।'

'स्वयं यवनाः इति वदन्तः केचन म्लेच्छाः बौद्धानां द्रोहेण युद्धे जित्वा अस्मदीयान् राज्ञः मारितवन्तः। अनन्तरं दुष्टमृगाः इव निरायुधप्रजाः मारितवन्तः। अस्मदीयाः स्त्रियः नीतवन्तः। शरणागतानां स्वमतं प्रति परिवर्तनं कारितवन्तः। तेषां मतमेव श्रेष्ठम् इत्युच्यते तैः। एतादृशैः अनुयायिभिः युतं मतं श्रेष्ठमेव भवेत् खलु! तस्य सर्वत्र प्रसारार्थम् एतान् क्रमान् आचरन्ति इति वदन्ति ते। प्रजाः तु किं कुर्युः? स्थानान्तरणं कृत्वा पार्श्वस्थराज्यं प्रति गतवन्तः।'

बहुकालं यावत् मौनम् आवृतम्। सौराष्ट्रे स्वस्य अवधाने आगतान् सर्वान् विचारान् उक्त्वा शङ्करः अन्ते अवदत् –

'अनेन शान्तिः बहून् विचारान् आश्रित्य तिष्ठति इति ज्ञातं खलु? आत्म-चिन्तनस्यापि शान्तिः अपेक्ष्यते, शास्त्राध्ययनस्यापि शान्तिः अपेक्ष्यते, कर्मिणः अपि शान्तिः अपेक्ष्यते, साधारणसज्जनानाम् अपि शान्तिः अपेक्ष्यते। अस्याः शान्तेः जननं कथम्? रक्षणं च कथम्? शान्तिं जनयितुं समर्थाः दूरदर्शिनः च राजानः भवेयुः, तां रक्षितुं राजानः, प्रजाः च धर्मनिष्ठाः भवेयुः। तदा एव शान्तिः। मुमुक्षवः अस्मिन् शान्तिपरिसरे साधनां कुर्वन्ति। यदा साधना पक्वा भवति तदा आत्मचिन्तनार्थं ते पर्वतान्, अरण्यानि च आश्रयन्ति। विचारेऽस्मिन् चिन्तयन्तु' इति स्वस्य वचनानि उपसंहृतवान्।

स्वस्य मनसि कदापि अस्फुरिताभिः एताभिः समस्याभिः पृथ्वीधरः व्याकुलः अभवत्। इमां शान्तिं स्थिरीकर्तुं कः क्रमः आश्रयणीयः? बुद्धः शान्त्यर्थमेव अहिंसामतम् उपदिष्टवान् खलु? किन्तु प्रवृत्तं किम्? राजानः युद्धं स्थगितवन्तः, प्रजाजनाः देशद्रोहिणः अभवन्। अहिंसा हिंसामार्गं प्रादर्शयत्। अन्ते स्वयमपि मृताः। तेन कथ्यमानम् असम्बद्धप्रलापः इति बुद्धेन न ज्ञातमासीत् वा? अथवा तेन एकया रीत्या उक्तम् अनुयायिनः अन्यया रीत्या अवगत्य अन्यान् नाशयित्वा स्वयमपि नष्टाः वा इति न ज्ञायते। भवतु, इदं ज्ञात्वा प्रयोजनं किमस्ति? समाप्तः विषयः खलु? किन्तु अनेन चिन्तनेन एकः विचारः स्पष्टः अभवत् यत्, यावान् बुद्धिमान् चेदपि, उत्तमः चेदपि जनः समाजाय किं हितम् इति स्वयमेव निर्णेतुं न



शक्नोति। अतः अधुना किं भवेत् इति मम बुद्ध्या एव विचिन्त्य निर्णयकरणम् अपायकारि। तर्हि अन्यः कः मार्गः? इति बहुधा चिन्तितवान्। मार्गः न प्राप्तः। सायङ्कालः अभवत्। यन्त्रमिव सन्ध्यावन्दनमपि समापितवान्। अन्तः गत्वा गुरून् नमस्कृतवान्। झटिति न उत्थितवान्। उत्थाने महान् विलम्बः अभवत्। उत्थितः। पुनः चिन्तनम् आरब्धम् : 'सत्यम्, ईदृशी धर्मग्लानिः इदम्प्रथमतया तु न। आक्रमणम् अपि इदानीं प्रथमं न। अनादिकालादपि तानि जायमानानि एव सन्ति। विविधरूपेषु जायमानानि सन्ति। किन्तु धर्मः अनादिकालादपि रक्षितः एवास्ति, न नष्टः। कथं रक्षितः? वर्णाश्रमधर्माणाम् अभिवृद्ध्या एव रक्षितः। ब्रह्मक्षत्रौ मिलित्वा एव एतत् कार्यं निरूढवन्तौ। अतः मत्सदृशैः सामान्यैः नूतनतया विचिन्त्य करणीयं किमपि नास्ति। आर्षेयः क्रमः एव अनुसर्तव्यः। वैदिकसम्प्रदायस्य त्यागं विना कालानुगुणम् आचरणेषु स्वल्पं परिवर्तनं कृत्वा अग्रे सर्तव्यम्। यथाकालं करणीयानि परिवर्तनानि कानि इति ये केऽपि निर्णेतुं न शक्नुवन्ति। अस्मद्गुरुसदृशाः श्रेष्ठाः एव वदेयुः। अहं तु तेषां सैनिकः इव। तैः उक्तं करोमि' इति अचिन्तयत्।

द्वित्राणां दिनानाम् अनन्तरं गुरूणाम् आदेशानुसारं काश्याः विदुषां, प्रमुखब्राह्मणानां सभां च आयोजितवन्तः। तत्र भाषमाणः शङ्करः अवदत् – 'काशीनगरं विश्वनाथेन पाण्डित्येन च प्रसिद्धम् अस्ति। देशस्य सर्वेषां भागानां जनानाम् अपि अत्र अध्येतव्यम् इति अभिलाषः भवति; इत्युक्ते अत्रत्यानां विदुषां स्थानं गुरुतमम् इत्यभवत्। भवत्सु कोऽपि ब्राह्मणानां कर्तव्यं किम् इति वदति वा?'

विरूपाक्षशास्त्रिवर्यः उत्थितवान्। भगवद्गीतायाः श्लोकम् उक्त्वा, 'शमदमतपः-शौचसरलताशास्त्रश्रद्धाशास्त्रज्ञानात्मानुभवार्थम् एव ब्राह्मणः जनिं प्राप्नोत् इति, एतैः गुणैः रहितः केवलं ब्रह्मबन्धुः, न तु ब्राह्मणः' इति च अवदत्। अनन्तरं शङ्करः ब्राह्मणस्य विशेषकर्तव्यानि कानि इति अपृच्छत्। परमेश्वरदीक्षितः उत्थाय – 'अध्ययनम्, अध्यापनम्, यज्ञः, याजनम्, दानम्, प्रतिग्रहश्च कर्तव्यानि इत्युक्त्वा, तेषु अध्ययनयज्ञदानानि त्रैवार्णिकानाम् अपि कर्तव्यानि, अध्यापनं, याजनं, प्रतिग्रहश्च केवलं ब्राह्मणस्य कर्तव्यानि' इत्यवदत्।

अन्ते शङ्करेण दत्तः सन्देशः अयम् : 'विरूपाक्षशास्त्रिवर्यः परमेश्वरदीक्षितवर्यश्च ब्राह्मणानां कर्तव्यानि समीचीनतया प्रोक्तवन्तौ। एतेषु स्वाध्यायप्रवचने महत् तपः इति तैत्तिरीयोपनिषत् सूचयति। एतयोः एतावत् गुरुतमं स्थानं किमर्थम्? इति चेत्, धर्मः एतयोः आधारेण स्थितः अस्ति। यावत्पर्यन्तं स्वाध्यायप्रवचनानि समीचीनतया

प्रवर्तन्ते, तावत्पर्यन्तं जनेषु धर्मप्रज्ञा भवति। अपि च तेषाम् अभ्युदयनिःश्रेयसे धर्मेण एव प्राप्ते भवतः। अतः एव अध्ययनाध्यापनानि श्रेष्ठं तपः। तत्रापि पुरोहितस्य कर्तव्यं तु अतीव मुख्यम्। यतो हि सः पुरस्य हितचिन्तकः – पुरजनेभ्यः पूर्वं चिन्तयति। अतः एव राष्ट्रे वयं पुरोहिताः जागरूकाः भवामः – 'वयं राष्ट्रे जागृयाम पुरोहिताः' – इति वदति श्रुतिः। इत्युक्ते पुरोहितेन स्वयं वैदिककर्मानुष्ठाने भूत्वा, इतरे अपि यथा स्वकर्तव्येषु प्रवृत्ताः भवेयुः तथा अवधानं दातव्यम् इत्यभवत्। तर्हि पुरोहितस्य लक्षणानि कानि? सः प्रियभाषी, सर्वेषां सुहृद्, समदर्शी, स्वप्रशंसारहितः, सत्यभाषी, सरलः, परिदानवृत्तिरहितः, सहिष्णुः, अद्रोही, सङ्कोचस्वभाववान्, शमदमोपेतश्च भवेत्। एतेषां सर्वेषां तात्पर्यम् अवलोकयामः चेत्, समाजे ब्राह्मणस्य स्थानं कियत् गुरुतमम् इति स्पष्टं भवति। समाजः परमात्मसमः। ब्राह्मणक्षत्रियवैश्यशूद्र-वर्णाः अस्य परमात्मनः अवयवाः। अस्मिन् परमात्मनि ब्राह्मणः मुखस्थाने अस्ति। पञ्च ज्ञानेन्द्रियाणि, यत्र बुद्धिः कार्यं करोति तत् मस्तिष्कं च अत्रैव अस्ति। समग्रदेहस्य योगक्षेमं शिरः अवलम्ब्य विद्यते। हितमिति निश्चिते सति शरीरम् अग्रे सरतीति, अहितमिति निश्चिते सति प्रत्यावर्तते इति च ज्ञातमेवास्ति। तद्वदेव वैदिकपरम्परायाः आधारेण ब्राह्मणेन निश्चीयमानानि हिताहितानि समाजः अनुसरति। अपि च हिताहिते कालानुसारं परिवर्तेते। अतः कालानुसारं समाजस्य हिताहितनिश्चयः ब्राह्मणस्य कर्तव्यम्। अतः सः शास्त्रज्ञः, दूरदर्शी, त्यागी, तपस्वी, समाजविषये आस्थावान् च भवेत्। प्रस्तुतम् एतेषां गुणानाम् आवश्यकता महती अस्ति। कथमिति पश्यन्तु–

इतः पूर्वस्यां दिशि सिन्धुदेशे प्रायः १५० वर्षेभ्यः अपि म्लेच्छानाम् आक्रमणानि जायमानानि सन्ति। विविधानि दौर्जन्यानि जनाः अनुभवन्तः सन्ति। स्वदेशे निराश्रिताः भूत्वा पार्श्वस्थराज्येभ्यः स्थानान्तरिताश्च सन्तः ते गच्छन्तः सन्ति। एतान् विचारान् भवन्तः ततः आगन्तृभिः यात्रार्थिभिः जानीयुः। एतदर्थम् ऋषिमुनिभिः आरब्धा यात्रापद्धतिः उपयोक्तव्या। प्रसङ्गानुसारेण सर्वेषां सामान्यजनानां राज्ञां च मार्गदर्शनं करणीयम्। ब्राह्मणः एवं जागरूकः यदि न भवेत् तर्हि कालक्रमेण आक्रमणकाराः काशीम् अपि आगच्छेयुः। तावत्पर्यन्तमपि राज्ञाम् अनवधानता न समीचीना। स्वशाखावेदाध्ययने समाप्ते सत्येव राजभिः राज्यभारार्थम् अवधानं दातव्यं भवति; अतः प्रगताध्ययनस्य अवसरः न भवति। राजपदप्राप्त्यनन्तरं तु अध्ययनं सुदूरस्थ-विषयः। किन्तु ब्राह्मणस्य अध्ययनम् एकमेव कर्तव्यम्। एतत्सर्वं मनसि निधाय दायित्वेन कार्यकरणस्य आवश्यकता अस्ति। शीघ्रं जाग्रत; परिस्थितेः अतिरेकं



यावत् प्रतीक्षां मा कुर्वन्तु। विरूपाक्षशास्त्रिवर्य, चर्चनीयाः विचाराः इतोऽपि केऽपि सन्ति वा?'

कश्चन उत्थाय अवदत् : 'एकदा मम छात्रेण एकेन पृष्टः प्रश्नः अत्र प्रस्तूयते। बौद्धग्रन्थान् पठित्वा तेन पृष्टम् इदम् : बुद्धस्य मतानुगुणं वर्णः जन्मना न आगच्छति, गुणैः आयाति। ब्राह्मणकुले जनिं प्राप्तस्य तमोगुणाधिक्यमपि पश्यामः, शूद्रकुले जनिं प्राप्तस्य सत्त्वगुणाधिक्यमपि पश्यामः। अतः जन्मनः अनुसारं वर्णः न निश्चेतव्यः इति बुद्धः आर्षेयं वर्णधर्मं तिरस्कृतवान्। अस्य उत्तरं किम्?'

'भवत्सु कोऽपि वदति किम्?'

किञ्चित्कालं यावत् मौनम्। अनन्तरं विरूपाक्षशास्त्रिवर्यः 'भवद्भिरेव कथनं वरम्' इत्यवदत्। शङ्करः आरभत :

'प्रश्नोऽयम् अतीव जटिलः। यतो हि वेदेषु, पुराणेषु, इतिहासेष्वपि बुद्धस्य वचने सहमतम् अस्ति इव दृश्यमानानां व्यक्तीनाम् उल्लेखः अस्ति। ब्राह्मणकुले जनिं प्राप्य क्षत्रियाः अपि सञ्जाताः, शूद्रकुले जनिं प्राप्य मन्त्रद्रष्टारः ब्राह्मणाः अपि सञ्जाताः। एतस्य एकैकस्यापि कूलङ्कषरूपेण चर्चायाः आवश्यकता अधुना नास्ति; केवलं संक्षेपविश्लेषणं करोमि। सर्वेषु सर्वे गुणाः अपि भवन्ति। एकैकोऽपि गुणः, एकैकस्मिन् प्रसङ्गे, एकैकस्मिन् जने, एकैकया रीत्या च प्रकटितः भवति। उदाहरणार्थम्, सत्त्वगुणस्य प्राधान्ये सति एकः ध्यानस्थः भवति, अन्यः सद्ग्रन्थं पठितुम् उपविशति, चोरः सहजप्रेम्णा स्वस्य शिशोः आलिङ्गनमात्रं करोति। चोरः सद्ग्रन्थं तु न पठति, ध्यानस्थः तु सर्वथा न भवति। गुणानाम् अस्याः जटिलतायाः कारणं ज्ञातुं तेषां मूलं ज्ञातव्यम्। गुणाः स्वभावप्रभवाः – इत्युक्ते पूर्वतनजन्मसु कृतानां कर्मणाम् अनुसारं जनिं प्राप्नुवन्ति। अतः कर्माणि यथा जटिलानि तथा एव गुणाः अपि जटिलाः। ते केषु कदा, कया च रीत्या प्रकटन्ते इति कोऽपि वक्तुं न शक्नोति। आत्मतत्त्वज्ञानं विना कस्यापि गुणेभ्यः मुक्तिः नास्ति। अतः गुणेषु सत्स्वेव आत्मतत्त्वं प्रति जीवः अग्रे सरति इति केन निर्णेतव्यम्? स्वस्य निमित्तं स्वयमेव, स्वस्य निमित्तम् अन्येन वा निर्णयस्वीकरणम् असाध्यम्। धर्माधर्मौ पुरुषबुद्ध्या निर्णीतौ न भवतः इति अत्र उपविष्टाः सर्वेऽपि जानन्त्येव। अनयोः निर्णयकरणं केवलं वेदेन शक्यम्। तत्र इत्थम् उच्यते : यज्ञाचरणार्थं ब्राह्मणस्य सृष्टिः, यज्ञरक्षणार्थं क्षत्रियस्य सृष्टिः, यज्ञधनार्थं वैश्यस्य सृष्टिः, यज्ञपोषणार्थं शूद्रस्य सृष्टिः। एवं यज्ञार्थं वर्णसृष्टिः। अतः यज्ञः इत्युक्ते धर्मरक्षणमेव। अपि च धर्माध्यक्षः भगवान्। अयं सर्वेषाम् अन्तरात्मा।

यज्ञरक्षणार्थं कः किं दायित्वं निर्वोढुं शक्नोति इति निर्णीय तदनुसारं जन्म ददाति। पूर्वतनजन्मसु कृतं कर्म अनुसृत्य निश्चीयमानं गुणम् अनुसृत्य पुरुषस्य तत्तद्वर्णे जन्म दत्त्वा, 'यज्ञार्थं भवते मया दत्तम् इदं दायित्वं भवान् निर्वहति चेत् भवतः श्रेयः' इति कर्मविधानं करोति। अतः, पूर्वतनजन्मनां कर्मानुसारं वासनां जन्म च अङ्गीकृत्य बुद्धेन कृतः वर्णस्य तिरस्कारः स्वविरुद्धः। बुद्धः प्रत्येकं जनस्यापि एकैकस्मिन् समये एकैकं वर्णं वदति किम्? क्षणभङ्गवादी सः प्रायशः एवं वक्तुमपि न बिभीयात्! भवताम् अत्र एकः संशयः भवेत्। तर्हि वेदपुराणेतिहासेषु उक्तैः कैश्चित् वर्णधर्मस्य व्यतिक्रमः कृतः खलु? इति चेत्, आम्, मन्त्रद्रष्ट्रा भवितुं शूद्रेण कवषेण, ऐलूशेन च कृतं तपः कियत्! तत् विस्मृत्य सामान्येनापि वर्णधर्मस्य व्यतिक्रमः क्रियते चेत्, व्याघ्रं दृष्ट्वा शृगालेन स्वशरीरे तप्तरेखाङ्कनं कृतमिव भवति! विशेषतया कलियुगे सर्वेष्वपि योग्यता क्षीणदशायां भवति। केनापि एतादृशसाहसकरणम् असाध्यम्। अतः स्वस्य जन्मनः अनुसारं शास्त्रेण वर्णस्य यत् कर्म उच्यते, तेन कर्मणा यः भगवन्तम् अर्चति सः सिद्धिं प्राप्नोति, स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः। यावत्पर्यन्तं वर्णधर्मरक्षणं भवति तावत्पर्यन्तं जनानां सौख्यं, तस्य उल्लङ्घने जायमाने सत्येव दुःखम्। कालधर्मेण द्वापरस्य अन्ते एव वर्णधर्मस्य उल्लङ्घनम् आरब्धम्। तस्य फलमपि समाजेन अनुभूतम्। कलियुगे उल्लङ्घनम् अनुवर्त्यमानम् अस्ति; अतः समाजे क्षोभः अपि अधिकः जायमानः अस्ति। अयं कलियुगप्रभावः इत्युक्त्वा तूष्णीम् उपवेशनमपि अधर्मः एव। अतः भवन्तः सर्वे स्वाध्यायप्रवचननिष्ठाः सन्तः भवतां धर्मं पालयेयुः। अस्माकं देशस्य नाम भारतम्। अत्रत्याः जनाः ज्ञाने रमन्ते। ज्ञानरताः सन्तः सर्वेभ्यः अपि प्रकाशदातारः भवन्तु' इत्युक्त्वा शङ्करः भाषणं स्थगितवान्। कश्चन विद्वान् 'गुरुवर्याः! कुमारिलभट्टवर्यः इदानीमेव इदं कार्यं कुर्वन् अस्ति' इत्यवदत्।

'अहं तस्य नाम जानामि। तस्य ग्रन्थान् अपि पठितवान्। सः कुत्र निवसति?'

'अत्रैव प्रयागे।'

'एवं वा..। तर्हि तेन सह मेलनं करणीयम्' इत्युक्त्वा शङ्करः स्वस्य उभाभ्यां शिष्याभ्यां सह प्रयागं प्रति प्रस्थितवानेव।

इतः परं बौद्धमतस्य अवरोधे कुमारिलभट्टस्य पात्रं किमिति वक्तव्यम्। यस्मिन् कस्मिंश्चिदपि समूहे तत्रत्याः बहवः जनाः मुग्धाः एव भवन्ति। तैः सिद्धान्तस्तु न ज्ञायते। समूहस्य कतिपयनायकान् ते श्रद्धया अनुसरन्ति। एतेषु नायकेषु अपि द्वौ



गणौ भवतः। सिद्धान्तं न जानन्ति चेदपि नायकत्वस्य कामेन अनुयायिनाम् उद्रेककरणसामर्थ्ययुतानाम् उपद्रवकारिणाम् एकः गणः, सिद्धान्तस्य अज्ञानिनाम् अपरः गणः। समूहस्य क्रियाकलापेषु प्रधानतया न दृश्यन्ते चेदपि प्रभावस्तु सिद्धान्तिनाम् एव। बौद्धसमुदाये विद्यमाना रचना इयमेव। अत्रत्यानाम् उपद्रवकारिणां समस्या समाजेन राजकीयव्यवहारद्वारा परिहृता। तेषां मतानुसारं जीवननिर्वहणार्थं मुग्धानुयायिबौद्धेभ्यः अवसरं प्रकल्प्य, पुष्यमित्रः केवलं देशद्रोहिणाम् उपद्रवकारिणां शूलारोपणम् अकरोत्।[1] एतेन सह यवनाः तान् नाशितवन्तः।[2] तेषां स्तूपानि, सङ्घारामान्, विहारान्, बुद्धस्य प्रतिमाः च ध्वस्तवन्तः। बख्तियार् खिल्जी बिहारं प्रविश्य सर्वान् बौद्धानपि नाशितवानेव। शरणागताः इस्लाममतं प्रविष्टाः। केचन स्वेषां ग्रन्थान् स्वीकृत्य टिबेट्देशं प्रति, चीनादेशं प्रति च पलायितवन्तः।[3] एवं बौद्धानां समस्या परिहृता। किन्तु बौद्धमते अनुरागवन्तः सामान्यजनाः आसन् एव। एतान् एवमेव त्यजामः चेत् कालान्तरे पुनः समस्या जायेत इति भीतिः विद्वत्सु आसीत्। वैदिकसिद्धान्तस्य प्रबुद्धैः अस्य सामाजिकपरिहारः करणीयः आसीत्। बौद्धविदुषां, तेषां मुग्धानुयायिनां च परिष्करणमेव अयं परिहारः।

कर्मकाण्डमाश्रित्य इदम्प्रथमतया कुमारिलभट्टः इदं कार्यम् आरभत। बौद्धमतस्य दोषाणां बहिरानयनार्थम्, आदौ तस्य मतस्य अध्ययनं बौद्धगुरुमुखात् करणीयम् इति अभासत। तदर्थं बौद्धविद्यार्थिवेषेण बौद्धगुरुकुलम् अगच्छत्। वेदानां गाम्भीर्यं गहनतां च अजानन् सः गुरुः पुनःपुनः दुष्टवचोभिः वेदं निन्दति स्म। तत् सोढुम् अशक्तः भट्टः एकदा उद्बोधनस्य मध्ये रोदनमकरोत्। गुरुणा, अन्यैः विद्यार्थिभिः च सः वेदभक्तः इति ज्ञातम्। बौद्धान् पूर्णतया नाशितवतां यवनानाम् उपरि जायमानस्य द्वेषस्यापेक्षया अधिकः द्वेषः आक्रोशः च तस्योपरि समजायत। तं ताडयित्वा बहिः नुन्नवन्तः। तदा सोपानेभ्यः अधः पतनेन तस्य एकं नेत्रम् अपगतम्। प्रतिक्रियात्मकेषु सर्वेषु व्यक्तिनिष्ठमतेषु अपि एतादृशी असहना भवत्येव। अस्य इतिहासः एव प्रमाणम्।

प्रयागं प्राप्तः शङ्करः कुमारिलभट्टस्य गृहं कुत्रास्तीति पथिकेषु विचारितवान्।

---

1. Rhys Davids : Journal of Pali Text Society (1896) – 'There is no proof to establish any deliberate preplanned or systematic attempt on the part of vedic rulers to annihilate the Buddhists. The very idea of forcible extinction is basically wrong.'
2. Vincent Smith : Early History of India – p.382.
3. Vincent Smith : Early History of India – p. 420.

‘अये! सः महोदयः तु मरणदशायाम् अस्ति’ इत्युक्त्वा ते स्थलं सूचितवन्तः।

‘किमर्थम्? किं जातम्?’

‘कापि उन्मत्तता। सः बौद्धगुरोः बौद्धमतम् अधीत्य अनन्तरं तस्य खण्डनम् अकरोत्। तस्मात् बहवः स्वेषाम् अविवेकं परित्यज्य वैदिकधर्मं प्रति प्रत्यागताः। एतेन सन्तोषमनुभूय आजीवनं तदेव कार्यं करणीयमासीत् । तद्विहाय सः देहपरित्यागं कुर्वन् अस्ति। आत्मना कृतस्य गुरुद्रोहस्य तत् प्रायश्चित्तमिति! कोऽयम् अविवेकः! कीदृशः विद्यावान् चेदपि किं फलम्! तुषाग्नौ पद्मासने उपविष्टः अस्ति! प्रायश्चित्तार्थं मन्दं मरणं प्राप्तव्यमिति!’ इति उक्त्वा ते अग्रे गताः। शङ्करेण शीघ्रं गत्वा दृष्टे सति, सत्यमेव! कुमारिलभट्टः कण्ठं यावत् आवृते तुषराशौ उपविष्टवान् अस्ति। अधस्तात् अग्निः, परितः स्निग्धः धूमः। शङ्करस्य महद् दुःखं जातम्।

‘भट्टवर्य! शङ्करः इति मम नाम। भवद्दर्शनार्थमेव उत्साहेन आगतः। कोऽयम् अविवेकः? अनुक्षणम् ततः उत्थाय आगम्यताम्। सर्वमपि भाषावहै।’

क्षीणस्वरेण कुमारिलः अवदत् : ‘शङ्करवर्य! अहं भवन्तं जानामि। भवतः सूत्रभाष्यम् अपठम्। अद्भुतमस्ति। अहमधुना भवते कमपि सत्कारं कर्तुं न शक्नोमि। नमस्कारमपि कर्तुं न शक्नोमि। क्षाम्यतु।’

‘भट्टवर्य! धर्मरक्षणार्थं भवतः जीवनम् अतीव मुख्यम्। झटित्येव उत्थाय आगम्यताम्।’

‘न। अधः एतावता एव सर्वं दग्धम्।’

‘अहमेव उत्थाप्य आनीय कमण्डलोः जलं प्रोक्ष्य जीवयामि’ इत्युक्त्वा शङ्करेण पदनिक्षेपे क्रियमाणे सत्येव कुमारिलः उच्चैः अवदत् – ‘अये! तथा न करोतु। माम् त्यजतु। मम प्रायश्चित्तस्य विघ्नं मा करोतु।’

‘कुमारिलवर्य! शुक्राचार्यात् सञ्जीविनीविद्याम् अधीत्य देवतानां श्रेयः यः कृतवान् सः कचः गुरुद्रोही वा? धर्मरक्षणार्थं भवता कृते सत्कार्ये पापं न द्रष्टव्यम्। वेदनिन्दकः गुरुः, गुरुः कथं भवेत्? तस्य खण्डनं गुरुद्रोहः कथं भवेत्? गृहं प्रविष्टस्य दुष्टमृगस्य उपायेन बहिः पातनं न दोषाय। भवता यत् क्रियते सः अविवेकः, अहं भवन्तम् उत्थापयामि।’

‘अये! सर्वथा मास्तु। अहं भवन्तं प्रार्थये। स्वसंस्कारानुगुणं भवितुम् अनुमन्यताम्।’

‘मम भाष्यं समग्ररूपेण बोधयित्वा भवता सह तिष्ठन् धर्मरक्षणकार्यं करोमि इति विचिन्त्य मया अत्र आगतम्। परम् अत्र एवं प्रवृत्तं खलु!’



‘शङ्करवर्य! मम शिष्येण मण्डनमिश्रेण इदं कार्यं कारयतु। मां परित्यजतु।’

स्वल्पसमयानन्तरं कुमारिलभट्टः मृतः अभवत्। शिष्यैः सह प्रत्यागमनसमये शङ्करः अवदत् : ‘स्वयमेव शरीरं दग्ध्वा मन्दं मृतवान् इत्युक्ते तस्य सहना कियती तीव्रा! धर्मः एकदेशतया अवगम्यते चेत् कियान् अविवेकः भवेत् इत्यस्य अयमेव दृष्टान्तः।’

ततः मण्डनमिश्रेण मेलितुं शिष्यैः सह माहिष्मतीनगरं प्रति प्रस्थितः।

## ८. माहिष्मतीं प्रति

कुमारिलभट्टशिष्यस्य मण्डनमिश्रस्य असदृशं पाण्डित्यम्। तस्य धर्मपत्न्याः उभयभारत्याः अपि तदनुरूपं पाण्डित्यमेव। विवाहात् पूर्वमेव परस्परं पाण्डित्यविषये श्रुत्वा अनुरक्तौ। उभयोः कुले अपि पाण्डित्ये, सम्प्रदाये च प्रसिद्धे। एतौ तु कुलमुकुटे। विवाहः वैभवेन प्रवृत्तः। विवाहानन्तरं, कर्मानुष्ठानं समाप्य मण्डने उत्तिष्ठति सत्येव कर्मविचारे चर्चा, यस्य शास्त्रस्य अध्ययनार्थम् उपविष्टं तस्य शास्त्रस्य चर्चा, अध्ययनानन्तरं तत्रत्यसमस्यानां विचारे चर्चा इत्येवं तयोः जीवनमेव शास्त्रमयमासीत्। सरससल्लापाः अपि विद्वत्तापूर्णाः हास्ययुताः भवन्ति स्म। जनाः एतौ दम्पती सरस्वतीब्रह्माणौ इत्येव वदन्ति स्म। मण्डनमिश्रः मीमांसाशास्त्रे ‘शास्त्रकेसरी’ इति बिरुदं प्राप्तवान् आसीत्। विशालं गृहम्। बालैः, दूरदेशात् अध्ययनार्थम् आगतैः, मेधाविशिष्यैः, चर्चार्थम् आगच्छद्भिः तेजस्विभिः विद्वद्भिः, बन्धुमित्रैः च गृहं सर्वदापि पूर्णं भवति स्म। मण्डनस्य षष्टिः वर्षाणि।

प्रयागात् प्रस्थितः शङ्करः मध्याह्नात् पूर्वमेव माहिष्मतीनगरस्य बहिर्भागं प्राप्तः। ग्रामात् बहिः, मार्गात् अनतिदूरे पुष्करिणी। तत्र वस्त्राणि क्षालयन्त्यः, पात्राणि क्षालयन्त्यः, गायन्त्यः हसन्त्यः च महिलाः स्वीये एव लोके सन्ति।

‘पद्मपादवर्य, मण्डनस्य गृहं कुत्र अस्ति इति ताः पृष्ट्वा आगच्छतु’ इत्यवदत् शङ्करः। पद्मपादः तावत्पर्यन्तं मुखम् अवनमय्य एव गत्वा, मुखम् अवनमय्य एव विचारितवान्। त्रिचतुराः निमेषाः एव अतीताः। मार्गपर्यन्तं तासां भाषणं न श्रूयते चेदपि हासः श्रूयते स्म। पद्मपादः गम्भीरमुखः प्रत्यागत्य अवदत् :

‘साक्षात् गम्यते चेत् एका कदलीवाटिका प्राप्यते। तस्याः अनन्तरं दक्षिणतः गन्तव्यम्। तत्र दक्षिणभागे अन्तिमं गृहं तस्य। गमनानुपदमेव पञ्जरस्थाः शुकाः

Mahaparivrajaka

शब्दायन्ते।'

'एतावतः कथने तावान् विलम्बः किमर्थम्? ताः किमर्थं हसन्ति?'

'ताभिः उक्तं सर्वं वक्तुं मम सङ्कोचः भवति।'

'वदतु, चिन्ता नास्ति।'

'भवत्सदृशाः संन्यासिनः बहवः वादार्थम् आगताः। मण्डनः तान् पराजित्य, प्रायश्चित्तं कृत्वा, गृहस्थाश्रमस्वीकारं कारितवान्। अस्माकं ग्रामस्य कस्याः कन्यायाः कङ्कणबलम् आगतमस्ति वा! – इति उच्चैः हसितवत्यः।'

शङ्करः हसितवान्। पृथ्वीधरस्य मुखे लघुहासः। पद्मपादः किञ्चिदपि न हसितवान्! त्रयः अपि मण्डनगृहदिशि प्रस्थिताः।

तस्मिन् दिने मण्डनस्य गृहे तस्य पितुः श्राद्धम्। गृहस्य मुख्यद्वारं पिहितमस्ति। गृहस्य पुरस्तात् रङ्गवल्ली नास्ति। कुतपकाले मण्डनः निमन्त्रितब्राह्मणानां पादप्रक्षालनम् अकरोत्। अधुना भोजनसमयः। शङ्करपरिवारः गृहं प्राप्नोत्। गच्छति सत्येव 'वेदः स्वतः प्रमाणं वा? परतः प्रमाणं वा? कर्मफलदातृ कर्म वा? ईश्वरः वा? जगत् नित्यं वा? अनित्यं वा?' इति शुकवाणी श्रुता। शङ्करस्य महदाश्चर्यम्! मण्डनस्य गृहस्य शुकाः एव एवं चेत्, मण्डनः कीदृशः स्यात्! शुकानां शब्दं श्रुत्वा पार्श्वगृहस्थाः बहिरागताः। शङ्करपरिवारं दृष्ट्वा अवदन् 'अद्य तेषां गृहे श्राद्धम्। भवद्भिः भिक्षा न प्राप्यते। अस्माकं गृहम् आगच्छन्तु।'

'तस्य दर्शनानन्तरमेव भिक्षा' इत्यवदत् शङ्करः। 'अद्य सायङ्कालं यावत् तेषां दर्शनम् अशक्यम्।' शङ्करः तूष्णीं पश्यति स्म। एतन्मध्ये एकः बालकः पृष्ठतः धावन् गृहं गत्वा 'केऽपि संन्यासिनः आगताः' इत्यवदत्। द्वौ शिष्यौ अपि वितर्द्याम् उपवेश्य बालकात् ज्ञातेन पृष्ठद्वारेण शङ्करः गृहं प्राविशत्। षष्ट्यधिकवयाः कर्मठः मण्डनः हस्ते तिलान् दर्भान् च धृतवानस्ति। षोडशवयस्कः कश्चित् संन्यासी गृहस्य पृष्ठभागे एव स्थितवान् अस्ति। कोपेन आशरीरं दग्धम्। मुख्यद्वारं पिहितं चेदपि, पृष्ठतः द्वारेण आगतवान् खलु अयम्!

'कुतो मुण्डी!' इत्यवदत्।

'गलात् उपरि।'

दन्तान् कटकटापयन् मण्डनः अवदत् – 'मया, भवता आगतः मार्गः पृष्टः।'

'अहो, किमुक्तं तेन?' इति प्रतिप्रश्नः।

'भवतः माता विधवा इति उक्तम्।'



'अहो.. मार्गेण सह भाषणं कृत्वा किमर्थं तस्मात् तर्जनं प्राप्तवान्!'

'रे, किं प्रलपति? सुरा पीता वा?'

'पीता न, श्वेता।'

'भवान् सुरायाः वर्णमपि जानाति वा?'

'अहं तस्याः वर्णं केवलं जानामि, भवान् रुचिमपि जानाति।'

एवं मण्डनस्य एकैकस्मिन् वचने अपि वाच्यार्थं स्वीकृत्य अनेन बालसंन्यासिना दीयमानानि दृढानि उत्तराणि श्रुत्वा निमन्त्रिताः ब्राह्मणाः विस्मिताः, अनन्तरं भयं च अनुभूतवन्तः।

अयं कश्चन सामान्यसंन्यासी न, अधुना मण्डनस्य समाश्वासनं वरम् इति अभासत तेषाम्। ते अवदन् :

'मण्डनवर्य, अद्य श्राद्धम्। केनापि कारणेन कोपः न करणीयः। विष्णुस्थाने तमेव उपवेशयतु।'

ब्राह्मणवचनं न उल्लङ्घनीयम्। यत्नेन मनः शान्तं कृत्वा मण्डनः अपृच्छत् : 'भवतः नाम किम्?'

'शङ्करः इति वदन्ति।'

'विष्णुस्थाने उपविश्य भोजनं करोतु। पादौ प्रक्षालयामि, आगच्छतु।'

'मण्डनवर्य, मया सह अन्यौ द्वौ स्तः। बहिः वितर्द्याम् उपविष्टौ।'

'तयोः भोजनम् अनन्तरं भवतु, अधुना भवान् करोतु' इत्युक्त्वा शङ्करस्य पादौ प्रक्षाल्य भोजनार्थम् उपवेशितवान्। आपोशनं हस्ते निधातुं मण्डने उद्युक्ते सत्येव शङ्करः तम् अवरुध्य अवदत् :

'महाभाग! केवलम् अन्नभिक्षार्थम् आगतः अहं न, आदौ वादभिक्षार्थम् आपोशनं प्रयच्छतु।'

'तथैव अस्तु।'

'कदारभ्य?'

'श्वः आरभ्य।'

आपोशनदानावसरे मण्डनस्य हस्तः कम्पितः। अन्तर्भागात् तीक्ष्णदृष्ट्या उभयभारत्यां पश्यन्त्यां तस्याः दक्षिणनेत्रं स्फुरितम्। भोजनानन्तरं बान्धवैः सह शिष्ययोः भोजनमभवत्। अनन्तरं त्रयः अपि पार्श्वस्थं मन्दिरं प्रति गतवन्तः। वादः प्रचलतीति वार्ता दावानलः इव तस्मिन्नेव दिने ग्रामे सर्वत्र प्रसृता। परेद्यवि पार्श्वस्थग्रामेषु

Maha Parivrajaka

अपि प्रसृता।

परेद्यवि गृहस्य विशाले प्राङ्गणे सभायाः व्यवस्था। प्रवचनानि, एतादृश्यः सभाः च भूयो भूयः प्रचलन्तीत्यतः तत्रैव विद्यमानायां वेदिकायाम् अभिमुखं द्वयोः आसनयोः सज्जीकरणेन व्यवस्था पूर्णतां गता। माहिष्मत्याः सर्वे विद्वांसः, विद्यार्थिनः, पार्श्वग्रामस्थाः च समयात् पूर्वमेव समवेताः। शङ्करः अपि समयात् पूर्वमेव प्राप्नोत्। व्यवस्थाकर्तृषु अन्यतमेन केनचित् आसनं प्रदर्श्य उपवेष्टुम् उक्ते सति हसन्मुखेन एव निराकृत्य भित्तेः पार्श्वे विद्यमाने अन्यस्मिन् आसने उपाविशत्। मण्डनः प्राविशत्। जनाः सर्वे उत्थिताः। झटित्येव शङ्करः अपि उत्थाय गत्वा मण्डनं करग्राहं समानीय 'भवान् उपविशतु' इत्यवदत्।

'भवन् उपविशतु।'

'तथा न, भवान् ज्येष्ठः, आदौ भवता उपवेष्टव्यम्' इत्युक्त्वा तस्य उपवेशनानन्तरं स्वयम् उपविष्टवान्।

सभायां सूची पतति चेदपि श्रूयेत, तथा निश्शब्दता। किन्तु मण्डनस्य मस्तके तु कोलाहलः। 'ह्यः तथा आसीत्, अद्य एवम् अस्ति, अयं कः स्यात्? अस्य गभीरता एव न ज्ञायते खलु!' इति चिन्तयन् आसीत्। अन्ते मनसि समाधानं कृत्वा व्यवस्था सर्वा समीचीना अस्ति इति स्पष्टतया ज्ञात्वा अनन्तरम् 'आरब्धुं शक्यं वा?' इत्यपृच्छत्।

'आरब्धुं शक्यम्। किन्तु कश्चन अध्यक्षः अपेक्ष्यते खलु?'

मण्डनः 'ओ, तथा वा' इति युक्तं जनम् अन्वेष्टुं सभाम् अपश्यत्। यत्र यत्र तस्य दृष्टिः गच्छति, तत्र सर्वत्र विद्वांसः शिरः अवनमयन्ति स्म! तत् दायित्वं निर्वोढुं कोऽपि सिद्धः नासीत्। अन्ते, उपविष्टासु स्त्रीषु काचित् 'अम्बा भवितुम् अर्हेत् खलु?' इत्यवदत्। मण्डनः हसित्वा शङ्करम् अपश्यत्। शङ्करः 'अस्तु' इत्यवदत्। हसतः मण्डनस्य नेत्रे विस्तृते अभवताम्। भ्रुवौ कुटिलतां गते।

'भवतु वा?'

'अवश्यमेव।'

वार्ता अन्तः गता। उभयभारतीदेवी बहिरागत्य 'कः विचारः?' इत्यपृच्छत्।

'सभायां भवत्या अध्यक्षस्थानं निर्वोढव्यम् इति अभिप्रायः आगतः। शङ्करः अङ्गीकृतवान्।'

'आर्यपुत्रः अङ्गीकरोति किम्?'



'महाभाग, प्रयागे एव तस्याः पाण्डित्यविचारे बहुधा अश्रौषम्, सर्वथा सन्देहः मास्तु, अङ्गीकरोतु' इत्यवदत् शङ्करः। मण्डनस्य सूचनानुसारं तृतीयस्य आसनस्य व्यवस्था कृता। देवी गृहस्य सर्वं दायित्वम् अन्येभ्यः दत्त्वा अध्यक्षपीठम् अलङ्कृतवती। सभायां प्रीतिपूर्वकं करताडनमभवत्। तत्र स्त्रीणां प्राधान्यम्। अध्यक्षा अवदत् – 'गुरुकुलस्य कार्यदर्शिभिः यज्ञनारायणदीक्षितैः आदौ शान्तिमन्त्रः पठ्यते।'

दीक्षितः उत्थाय 'नमस्सदसे नमस्सदसस्पतये नमस्सखीनां पुरोगाणां चक्षुषे सर्वमायुरुपासताम्' इत्युक्त्वा उपाविशत्।

अध्यक्षा अवदत् : 'अधुना भवतोः पक्षयोः संक्षिप्तप्रतिपादनं भवतु, अनन्तरं स्वीयां प्रतिज्ञां कुर्वन्तु। भवन्तः आरम्भं कुर्वन्तु' इति मण्डनम् असूचयत्। मण्डनस्य प्रतिपादनं प्रतिज्ञा च इत्थमासीत्;

'दुःखनिवारणार्थं सुखप्राप्त्यर्थं च वैदिकं कर्म एकः एव मार्गः। नित्यः वेदः जीवनदुःखनिवारणार्थं प्रतिषिद्धं कर्म, सुखप्राप्त्यर्थं काम्यकर्म च सूचयति। कर्म एव फलदातृ। फलम् अनुक्त्वा सूचितानि नित्यनैमित्तिककर्माणि विधिः। एतानि न क्रियन्ते चेत् काम्यकर्मणः अधिकारः नास्ति। कश्चित् प्रतिषिद्धकर्माणि परित्यज्य, नित्यनैमित्तिककाम्यकर्माणि कुर्वन् सर्वदा सुखेन भवति चेत् तदेव जीवनस्य सार्थक्यम्। यः पुनरावृत्तिरहितं मोक्षं वाञ्छति सः अस्मिन् जन्मनि काम्यप्रतिषिद्धकर्मणी परित्यज्य केवलं नित्यनैमित्तिककर्मणी कुर्यात्। एतेन सुखदुःखे, प्रत्यवायश्च न भवतः, इत्युक्ते विना कर्म सुखप्राप्तिरपि असाध्या, मोक्षः अपि असाध्यः। अस्य वेदः एव प्रमाणम्।

यदि मम पक्षसिद्धौ अहं पराजित्य, भवतः पक्षसिद्धौ भवान् जयं प्राप्नोति तर्हि अहं भवतः शिष्यः भवामि।'

'इतःपरं भवतः पक्षं प्रतिज्ञां च उपस्थापयतु' इति अध्यक्षा शङ्करं प्रत्यवदत्।

शङ्करः अवदत् – 'जगत् अनित्यम्, ऐहिकामुष्मिकसुखे अपि अनित्ये। जीवजगतोः विद्यमाना जीवस्य भेदबुद्धिरेव कर्मणः आधारः । किन्तु जीवः, जगत् एतत् उभयमपि समानमेव ब्रह्म । तत् आनन्दस्वरूपम् । तत् अहमिति अवगमनेन जीवस्य आत्यन्तिकं सुखम् । अस्य सुखस्य कर्मणः च सम्बन्धः नास्ति। अस्य उपनिषदः एव प्रमाणम्।

इयं मम प्रतिज्ञा : मया भवतः शिष्येण भवितुं भवान् स्वपक्षं सिद्धं करोति चेदपि पर्याप्तम्। अथवा मम पक्षम् असिद्धं करोति चेदपि पर्याप्तम्। इतः परम् अहं प्रश्नान् पृच्छामि किम्?' इति अध्यक्षाम् अपश्यत्।

MahaParivrajaka

'प्रष्टुं शक्यते।'

'कर्म एव फलदातृ इति भवान् अवदत्। अथापि कृतं कर्म तत्तत्क्षणे एव नष्टं भवति इति प्रत्यक्षम्। तत् कथं फलदातृ भवेत्?'

'कर्म फलं दत्त्वा एव नष्टं भवति। कालक्रमेण तत् फलं भोक्ता भुनक्ति।'

'भोक्तृसम्बन्धात् पूर्वं तत् फलम् इति समञ्जसं न भवति खलु?'

'तथा न, कृतं कर्म अपूर्वम् इति अवस्थाविशेषं प्राप्नोति। फलप्राप्तिः भवति तेन अपूर्वेण।'

'कर्मणः अवस्थाविशेषः अपूर्वं कर्म इव अचेतनम्। तदेव स्वतन्त्रतया प्रवृत्तं सत् भोक्तुः फलप्राप्तिं कथं करोति?'

'भवतः उक्त्या श्रुत्याक्षेपः कृतः भवति। यतो हि, 'स्वर्गकामः ज्योतिष्टोमं यजेत' इत्यादिविधिवाक्येषु श्रुतिः एकः कर्ता अस्ति इति कृत्वा, कर्म, फलं च केवलम् उभयमेव वदति। अतः श्रुतौ सन्देहम् अकृत्वा कर्म एव फलदातृ इति वक्तव्यम्। प्रत्यक्षे अपि, शैत्ये कम्बलस्य आच्छादनेन एव औष्ण्यं भवति खलु! कर्म एव फलदातृ किमर्थं न भवेत्?'

'फलदातुः विचारे यदि श्रुतिः मौनं वहति तर्हि एतादृशसन्देहाः करणीयाः भवन्ति स्म। किन्तु श्रुतिः स्पष्टतया ईश्वरः एव फलदाता इति वदति। 'स वा एष महानज आत्मा अन्नादो वसुदानः।' तावदेव न, कर्मफलप्रदाने आवश्यकानां धर्माधर्माणां कर्ता अपि ईश्वरः इति प्रोक्तम्। 'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्यो उन्निनीषते, एष उ एव असाधु कर्म कारयति तं यमधो निनीषते' – यम् एतेभ्यः लोकेभ्यः उन्नेतुम् इच्छति, तेन द्वारा साधु कर्म कारयति, यम् अधः कर्तुम् इच्छति तेन द्वारा अयमेव असाधु कर्म कारयति। भवद्भिः क्रियमाणायाः अपूर्व-कल्पनायाः विरोधम् अहं न करोमि। कर्म अथवा अपूर्वम् अनुसृत्य ईश्वरः फलदाता भवति इति वदन् अस्मि। अपि च कम्बलस्य दृष्टान्ते तु, एतावता एव कर्मफल-सम्बन्धज्ञाता चेतनः कम्बलस्य आच्छादनकर्मणि प्रवृत्तः सन्, औष्ण्यं भवति इति तत्कालप्रत्यक्षफलं प्राप्नोति। वैदिककर्मणि कर्तुः कर्मफलसम्बन्धः न ज्ञायते; तत् फलं देशकालनिमित्तानि आश्रित्य कालक्रमेण भवति। अतः अचेतने कर्मणि अथवा अचेतने अपूर्वे प्रवृत्तिः कर्तुः भवति इति असाध्यम्। ईश्वरेण एव भवेत्।'

प्रत्याक्षेपप्रतीक्षायां क्षणकालं यावत् मौनेन भूत्वा, प्रत्याक्षेपः नास्ति इति ज्ञात्वा शङ्करः कथनम् अनुवर्तितवान् :

१. विग्रहवत्त्वम् = शरीरत्वम् + हविर्भोक्तृत्वम् + ऐश्वर्यम् + प्रसन्नत्वम् + फलदातृत्वम्



'कर्मणा सह एव वेदे उक्तां देवतां कर्माङ्गतया भवन्तः किमर्थं न स्वीकृतवन्तः?'

'देवतानां विग्रहवत्त्वं नास्ति।[1] कथमिति चेत्, यथा एकः एव ब्राह्मणः समाने समये बहुभ्यः भोजनं स्वीकर्तुं न शक्नोति, तथा समाने समये प्रवर्त्यमानेषु बहुषु यागेषु एका एव देवता हविः स्वीकर्तुं न शक्नोति।'

'भवतां दृष्टान्तः समीचीनः एव, किन्तु सर्वाणि कार्याण्यपि तथा न। उदाहरणार्थं समाने समये अनेके एकं नमस्कर्तुं शक्नुवन्ति। तद्वदेव शरीरवत्यै एकस्यै एव देवतायै समाने काले बहवः द्रव्यम् अर्पयितुं शक्नुवन्ति। अतः देवतायाः विग्रहवत्त्वस्य कर्मणः च विरोधः नास्ति।'

'इदम् अङ्गीकरणयोग्यं, किन्तु देवतायाः शरीरमस्ति चेत् वेदप्रामाण्यस्य हानिः भवति।'

'तत् कथम्?'

'शब्दः, अर्थः, अनयोः द्वयोः सम्बन्धः – एतत् त्रयमपि नित्यम् इत्यस्य आधारेण एव वेदप्रामाण्यं सिद्धं भवति। इन्द्रादिदेवतानां शरीरमस्ति चेत् तासां मरणानन्तरम् अयं सम्बन्धः त्रुटितः भवति, तेन वेदप्रामाण्यस्य हानिः भवति खलु!'

'वेदे वक्ष्यमाणाः इन्द्रादिशब्दाः इन्द्राद्याकृतीः सूचयन्ति, जनिं प्राप्य मरणं प्राप्नुवतीः इन्द्रादिव्यक्तीः न। इन्द्रादिशब्दाः सेनापतीत्यादिशब्दाः इव स्थानसूचकाः व्यक्तयः न। इन्द्रादिशब्दानां नित्यसम्बन्धः इन्द्राद्याकृतिभिः सह। इन्द्रादिव्यक्तीनां सृष्टिः 'एते' इत्यादिशब्दैः भवति। प्रजापतिः 'एते' इति देवताः, 'इन्दवः' इति पितॄन् च सृष्टवान् । एतासां देवतानाम् अनेकानि रूपाणि सन्तीत्यपि श्रुतिः वदति। ३३ देवताः उक्त्वा, ताः देवताः एकस्यामेव देवतायाम् अन्तर्भाव्य 'सः कः?' इति चेत् 'प्राणः' इति उक्तम्। अतः एकस्यैव प्राणस्य एककाले एव अनेकानि रूपाणि सन्ति इत्यभवत्। अतः एका एव देवता एककाले प्रवर्तमानेषु बहुषु यज्ञेषु स्वां अनेकैः रूपैः विभज्य कर्माङ्गभावं प्राप्तुं शक्नोति। देवतायाः अन्तर्धानशक्तिः अस्तीत्यतः अप्रत्यक्षतया कर्मणि भागग्रहणं शक्यम्।'

मण्डनस्य मौनं दृष्ट्वा शङ्करः अनुवर्तनमकरोत्; 'भवन्तः इतोऽप्येकं विचारम् उक्तवन्तः : नित्यनैमित्तिककर्मानुष्ठानाभ्यां प्रत्यवायदोषनिवारणम्, काम्यप्रतिषिद्धकर्मणोः त्यागेन स्वर्गनरकनिवारणं भवति। प्रारब्धस्य उपभोगेन क्षयः भवति। अतः इत्थं जीवनं क्रियते चेत् देहपातानन्तरं पुनर्जन्मनः अवसरः न भवति – तदा स्वस्वरूपे स्थानरूपः मोक्षः प्राप्यते इत्युक्तवन्तः। अहं भवतां पक्षं समीचीनतया निरूपितवानस्मि

MahaParivrajaka

किम्?'

मण्डनः 'आम्' इत्यवदत्।

'अस्य कल्पनस्य प्रमाणं नास्ति, इदं समञ्जसमपि न। यतो हि अस्मिन् सञ्चितकर्म गणनायां न स्वीकृतम्। अस्मिन् जन्मनि एव कृतं कर्म अपि गणनायां न स्वीकृतम्। एतयोः सञ्चितागामिकर्मणोः फलभोगार्थं जन्मानि भवन्त्येव।'

'अधुना क्रियमाणानि नित्यनैमित्तिककर्माणि सञ्चितागामिकर्मणां नाशं कुर्युः खलु?'

'तथा न। आदौ नित्यनैमित्तिककर्मणां प्रत्यवायदोषनिवारणं विना अन्यत् फलं नास्तीत्युक्त्वा, अधुना अपरस्य फलस्य कथनं न समीचीनम्। फलमस्तीति उक्तं चेत् तत् पुण्यमेव स्यात्। इदं सञ्चितागामिनोः पापं नाशयेत् चेदपि, पुण्यं न नाशयेत्; इदानीमेव विद्यमानस्य पुण्यस्य पुण्यं योजयति। अपि च सञ्चितागामिनोः पापम् इदं पूर्णतया नाशयति इति आश्वासनमपि नास्ति। तेन पापपुण्ये अवशिष्येते। अपि च यावत्पर्यन्तं कर्तृत्वं भवति पुण्यं पापं वा भवत्येव। अतः मोक्षप्राप्तिः असाध्या।'

'कर्तृत्वेन जायमानं कार्यम् अनर्थकारि भवितुम् अर्हति; कर्तृत्वशक्तिरेव अनर्थकारिणी न खलु?'

'तथा न, कर्तृत्वबुद्ध्या कृतस्य कर्मणः अनुसारम् ईश्वरेण कर्तृत्वशक्तिः दत्तास्ति। कर्तृत्वबुद्धौ पुण्यकर्मणः पापकर्मणः वा प्रवृत्तिः अवश्यं भवत्येव। अपि च कर्तृत्वबुद्धिः कर्मणा नष्टा न भवति, इतोऽपि परिपुष्टा भवति। अतः कर्मणा अपुनरावर्तिः सर्वथा असाध्या।'

सर्वेऽपि मौनेन सन्ति। बहुसमयं यावत् मण्डनात् प्रत्याक्षेपः नागतः। अध्यक्षा मण्डनं प्रति अवदत् : 'इतः परं परपक्षनिरासार्थं भवन्तः वादम् आरब्धुं शक्नुवन्ति।'

मण्डनः अवदत् : 'भवता उक्तं ब्रह्मात्मभावे विद्यमानम् उपनिषदुक्तं ब्रह्म क्रियासम्बन्धरहितम्। तस्मिन् हानोपादाने न स्तः।[१] अतः तेन कोऽपि पुरुषार्थः न सिद्ध्यति। यतो हि, यानि वाक्यानि क्रियां न वदन्ति तानि व्यर्थानि इति स्पष्टतया शास्त्रे उक्तम्।'

'तथा न। उपनिषत्सु विद्यमानानि पदानि वाक्यानि च निस्सन्दिग्धतया तादृशं ब्रह्म सूचयन्तीत्यतः तत् व्यर्थं भवितुं नार्हति।'

'शारीरिकक्रियासम्बन्धः नास्तीत्यतः एव तत् व्यर्थम् इति नोक्तवान्। तानि

१. हानम् = त्यागः, उपादानम् = ग्रहणम्



वाक्यानि कर्तृस्वरूपं देवतां च सूचयन्ति इति यदि स्वीक्रियते, तद्द्वारा ब्रह्म उपासनाकर्मणः अङ्गं भवति। तदपि नास्ति चेत् व्यर्थम् इति प्रोक्तम्।'

'तदपि न समीचीनम्। यतो हि, ब्रह्मात्मभावे 'तत्केन कं पश्येत् – केन कं पश्येत्?' इत्युक्त्वा कर्तृत्वमेव निराकृतम्। हानोपादानराहित्येन उपासनाविधेः अनङ्गं ब्रह्म अपुरुषार्थो न, सर्वक्लेशनाशरूपं श्रेष्ठतमः पुरुषार्थः। अतः विधिसम्बन्धरहितानां वाक्यानाम् अर्थः नास्तीति कर्मकाण्डस्य वाक्यं स्वीकृत्य ज्ञानकाण्डे अपि तथा एव नियमः स्यात् इति कथनं न समीचीनम्।'

'ब्रह्म अज्ञात्वा क्रियमाणा ब्रह्मोपासना निष्फला इत्यतः ब्रह्मज्ञानम् उपासनार्थं प्रोक्तमित्येव समीचीनम्। 'आत्मेत्येवोपासीत – आत्मा इत्येव उपासना करणीया' इति श्रुतौ एव उक्तं खलु?'

'इदं न समीचीनम्। यतो हि कर्मज्ञानब्रह्मज्ञानयोः महत् अन्तरम् अस्ति। शारीरिकं वाचिकम् मानसिकं च कर्म कर्मज्ञानस्य विषयः; सुखं तस्य कर्मणः फलम्। अर्थित्वसामर्थ्यविद्याः अनुसृत्य अस्मिन् फले तारतम्यमस्ति। अतः कर्मिणः शरीरवतः प्रियाप्रिययोः मोक्षः नास्ति। किन्तु ब्रह्मज्ञानस्य फलम् अशरीरत्वम्। अशरीरिणः प्रियमपि नास्ति, अप्रियमपि नास्ति। अशरीरत्वमेव मोक्षः। तत् कर्मफलं न। कर्मफलस्य ब्रह्मज्ञानफलस्य च अपरः भेदोऽपि अस्ति; कर्मफलम् अनित्यम्, ब्रह्मज्ञानफलं नित्यम्। पुनश्च, धर्मः इत्युक्ते कर्म इत्येव। अशरीरत्वस्य धर्मस्य च सम्बन्धः एव नास्ति। 'अन्यत्र धर्मात् अन्यत्र अधर्मात्, अन्यत्रास्मात् कृताकृतात् अन्यत्र भूताच्च भव्याच्च – तत् धर्मात् भिन्नम् अधर्मादपि भिन्नम्। कार्यकारणाभ्याम् अपि भिन्नम् भूतात् भव्यात् च भिन्नम्' इति कठश्रुतिः वदति। इतोऽप्यग्रे 'ब्रह्मविद् ब्रह्मैव भवति – ब्रह्मज्ञाता ब्रह्म एव भवति' इति श्रुतिः वदति। अतः ब्रह्मज्ञाने उपास्योपासकभेदभावस्य अवसरः नास्तीत्यतः ब्रह्मज्ञानम् उपासनायाः अङ्गं भवति इति सर्वथा अशक्यम्। 'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते – तदेव ब्रह्म इति जानातु, इदम्' इति यस्य उपासनं कुर्वन्ति तत् न' इति श्रुतिः साक्षादेव कथयति।'

'ब्रह्म क्रियासम्बद्धं न इति कथम्? तस्य ज्ञात्री बुद्धिक्रिया एव खलु?'

'न। अन्यदेव तद्विदितात् अथो अविदितादधि – तत् विदितात् अविदितात् च भिन्नम्।'

'एतादृशं वस्तु कस्यापि अनुभवे नास्ति। विद्यमानं वस्तु अनुभववेद्यं भवेदेव। कस्यापि अनुभवे नागच्छति चेत् तस्य अस्तित्वमेव न सिद्ध्यति।'

MahaParivrajaka

'तथा न। वेद्यस्य, अवेद्यस्य वा अप्राप्यः स्वयमेव अस्ति। स्वस्मात् भिन्नमेव वेत्तुं शक्यम्। एवम् अन्यस्य सर्वस्यापि वेत्ता सर्वस्मादपि भिन्नायां सुषुप्तौ सिद्धः भवति। माण्डूक्यश्रुतिः अमुं प्राज्ञः इत्यवोचत्। अयं मनोरूपोपाधिरहितः। अतः अमुं ज्ञातुं न शक्यते। पुनश्च अयं स्वः एव इत्यतः अज्ञानम् अपि असाध्यम्। अयमेव ब्रह्म।'

'आत्मा मन्तव्यः निदिध्यासितव्यः – इति तव्यत्प्रत्ययमुपयुज्य आत्मा मननाय निदिध्यासनाय च युक्तः इति प्रोक्तम्। तव्यत्प्रत्ययः विधिं सूचयति। अतः निदिध्यासनम् उपासना एव भवेत् खलु?'

'तथा न। मुमुक्षुः आत्मान्वेषणे भवति चेदपि, अनादिवासनाबलेन तस्य मनः बहिः प्रवर्तमानं भवति। तत् स्थगयित्वा प्रवाहरूपेण मनः आत्मनः दिशि वाहयितुं निदिध्यासनं प्रोक्तम्। एतत् विधिः न; उपासनाविधिः चेत् कालक्रमेण स्वस्मात् भिन्नं किमपि प्राप्तं स्यात्। किन्तु स्वस्मै प्राप्यते अहमेव, अपि च इयं प्राप्तिः अधुना एव अत्रैव भवेत्। अतः अत्र विद्यमानः तव्यत्प्रत्ययः विधिच्छायाप्रयोगः – विधिप्रयोगः न।'

'तथा चेत्, 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम् – शास्त्रस्य अर्थः क्रिया एव। अतः क्रियायां तात्पर्यरहितानि वाक्यानि निरर्थकानि'[१] इति शास्त्रवाक्यमेव असत्यं भवेत् खलु?'

'तथा न। भेदाधारिते कर्मकाण्डे अयं नियमः अस्त्येव। किन्तु, औपनिषदपुरुषबोधके ज्ञानकाण्डे तस्य अन्वयः न करणीयः।'

'किन्तु औपनिषदपुरुषस्य श्रवणं कृतवति जने अपि, श्रवणात् पूर्वमिव भेदबुद्धिं पश्यामः। अतः आत्मप्राप्तिः अधुना एव अत्रैव भवेत् इति कथनम् असाध्यम्।'

'श्रवणमात्रेणैव आत्मप्राप्तिः न भवति। मनननिदिध्यासने भवेताम्। यतो हि, इतरविषयाणां श्रवणेन जायमानस्य ज्ञानस्य, औपनिषदपुरुषस्य श्रवणेन जायमानस्य ज्ञानस्य च महदन्तरम् अस्ति। इतरविषयाणां ज्ञानं बुद्धौ स्थिरीभवति। अस्य पुरुषस्य ज्ञानं मनननिदिध्यासनाभ्यां द्वारा बुद्धिम् अतिरिच्य, तस्याः साक्षिरूपे आत्मनि स्थिरीभवति। एवं यस्य भवति केवलं तस्मिन् एव भेदबुद्धिः नष्टा भवति, सः अशरीरी भवति। तस्य प्रियं वा अप्रियं वा किमपि न भवति।'

'तर्हि भेदबुद्धौ नष्टायां सत्यामेव सः मरणं प्राप्नोति किम्?'

मण्डनेन एवं पृष्टे सत्येव उपविष्टाः सर्वे विद्वांसः उच्चैः हसितवन्तः। मण्डनेन तेषु

१. जैमिनिसूत्रम् १.२.१



MahaParivrajaka

दृष्टेषु सत्सु एव हासः स्थगितः। किन्तु शङ्करः हसन् एव उत्तरं प्रायच्छत् :

'मरणानन्तरमपि स्वर्गनरकयोः प्रियाप्रिये भवतः इत्यस्य शास्त्रमेव प्रमाणम्। किन्तु शरीरे जीवति सत्येव प्रियाप्रियरहितम् अशरीरत्वं ज्ञानिना प्राप्तं भवति।'

'तर्हि अशरीरत्वम् इत्यस्य अर्थः कः?'

'स्वस्य शरीरसम्बन्धराहित्यं सुषुप्तौ अनुभववेद्यं भवति चेदपि, जागरणे सत्येव शरीरसम्बन्धस्य वेद्यत्वं सशरीरत्वम्; इत्युक्ते इदं मिथ्याज्ञानम्; इत्युक्ते अध्यासः। सम्बन्धरहितः इत्यवगमनरूपं सम्यग्ज्ञानमेव अशरीरत्वम्।'

'अस्मिन् शरीरे विद्यमानस्य जीवस्य मरणानन्तरं परलोकप्राप्तिः भवति इति वक्तारः मीमांसकाः वयम्, अध्यासं न निराकुर्मः; येन जीवेन परलोकः प्राप्यते सः शरीरात् भिन्नः एव भवेत्। किन्तु अध्यासः मिथ्याज्ञानं न, गौणप्रयोगः; 'स्वस्य शरीरम्' इति कथनेन स्वयं शरीरात् भिन्नः इति ज्ञायते। अतः 'अहं पुरुषः' इति गौणप्रयोगः।'

'एवं कथनं नोचितम्। 'सिंहो देवदत्तः' इति गौणप्रयोगे देवदत्तस्य ज्ञानमपि अस्ति, सिंहस्य ज्ञानमपि अस्ति; अतः तयोः मध्ये विद्यमानस्य भेदस्य ज्ञानमपि अस्ति। किन्तु 'अहं पुरुषः' इति कथनावसरे अहं कः इति न ज्ञायते। अतः सः गौणप्रयोगः न, मिथ्याज्ञानमेव। किन्तु ज्ञानिनः विचारे 'वल्मीके पतितः सर्पनिर्मोकः इव इदं शरीरं पतितं भवति। अयम् अशरीरी, अयं ब्रह्म एव' इति वदति श्रुतिः।'

मण्डनात् पुनः कोऽपि आक्षेपः नागतः। बहुकालं यावत् सभायां मौनमासीत्। अन्ते अध्यक्षा 'वादप्रतिवादाः समाप्ताः। सभा समाप्ता' इत्युक्त्वा अन्तः अगच्छत्। सभायां गाढं मौनम् आवृतम्। अनन्तरं मण्डनः – 'यतिवरेण्याः, इतःपरं मया प्रष्टव्यं किमपि नास्ति। कृपया कञ्चित्कालं यावत् उपविशन्तु, आगमिष्यामि' इत्युक्त्वा अन्तः गतवान्। धर्मपत्न्याः प्रकोष्ठस्य द्वारम् अन्तर्भागात् पिहितम् आसीत्। मन्दं शब्दापितवान्, नोद्घाटितम्। अनन्तरं यज्ञशालां प्रति अगच्छत्। अग्निः मन्दं ज्वलति स्म। तमेव पश्यन् किञ्चित्कालं यावत् अतिष्ठत्। सोढुम् अशक्येन दुःखेन नेत्राभ्यां जलम् आगतम्। परिमार्ज्य अग्नेः प्रदक्षिणां कृत्वा नमस्कृतवान्। यज्ञेश्वरस्य पुरस्तात् उपविश्य, गतानां दिनानां सिंहावलोकनम् अकरोत्।

'हन्त! कर्म एव सर्वस्वम् इति भावितवान् खलु। उपनिषदः कर्मातिरिक्तम् अपरं तत्त्वं वदन्ति इति अज्ञात्वा, तदपि कर्मदृष्ट्या एव दृष्ट्वा, संन्यासिना सह वादम् अकरवं खलु, अहं कियन्तं दोषमाचरितवान्! कोऽपि मार्गभ्रष्टः बालकः इति

सम्भाव्य, अहम् अस्य विचारेऽपि दोषमाचरितवान्! समीचीनतया नावगत्य जैमिनिः ईश्वरमेव निराकृतवान् इति अवदम्। यदि अयं बालकः नागच्छेत्, तर्हि अहम् एतान् दोषान् एवमेव अनुवर्तयेयम्। किं पुण्यं कृतवान् वा, अधुना वा ज्ञानोदयः जातः खलु! निष्कामरूपेण मया कृता अग्न्याराधना मां रक्षितवती। अहं परमेश्वरं त्यक्तवान् चेदपि परमेश्वरः मां न त्यक्तवान्। इदं परमोत्कृष्टज्ञानं मया यथा प्राप्येत तथा अकरोत्। अयं बालकः बालकः न, परमेश्वरः एव। मया अस्मै किं दत्तम्? १५ दिनानि भिक्षा। सः मां केन अनुगृहीतवान्? ज्ञानदानेन। आहा!'

पुनः नेत्राभ्यां जलमागतम्। पुनः मार्जनं कृत्वा प्रत्यावर्त्य, तत्रैव उपविष्टं शङ्करं नमस्कृतवान् – प्रथमवारं – सर्वेषां विदुषां पुरस्तात्। मौनेन उपविष्टाः विद्वांसः भीताः। मण्डनेन अन्यस्य कृते नमस्कारकरणम् एतावत्पर्यन्तं केनापि न दृष्टम् आसीत्!

'भगवन्, अहं भवन्तं शरणम् आगतोऽस्मि' इत्यवदत्।

'भवतः गुरुः कुमारिलभट्टवर्यः मां भवतः सकाशे प्रेषितवान्। तेन भवता च बौद्धमतात् मर्माहतस्य वैदिकधर्मस्य रक्षणे महती श्रद्धां निरूढा। अस्मिन् कार्ये विद्यमानः भवतः अनुभवः अपारः। भाविदिनेषु तस्य सम्पूर्णोपयोगे विहिते सति समस्यायाः निश्शेषनाशनस्य दर्शनाकाङ्क्षा मदीया। कुमारिलवर्यः देहत्यागम् अकरोत्। अतः इदं कार्यं मया भवता च मिलित्वा एव करणीयम्। आगच्छतु, करवाव।'

एतावदुक्त्वा शङ्करः प्रस्थातुं सज्जः अभवत्। उभयभारतीदेव्या विचारः ज्ञातः। हसन्मुखी सा बहिरागता। शङ्करः अपृच्छत्; 'अम्ब, अहं प्रस्थातुं शक्नोमि किम्?'

'भवता अधुना एव प्रस्थातुं न शक्यते। बहुभ्यः दिनेभ्यः प्रवृत्ते वादे भवान् जयं प्राप्तवान् अस्ति। किन्तु अहं भवत्प्रतिवादिनः अर्धशरीरिणी इति स्मरणे भवतु। प्रतिज्ञापूर्त्यर्थं भवता अहमपि वादे जेतव्या।' मण्डनः हसितवान्। शङ्करः अपि हसन् एव अवदत्; 'अम्ब, इदं भवत्याः वचनं ममोपरि क्रियमाणः अनुग्रहः।'

'कदारभ्य वादः भवतु?'

'अम्ब, भवत्याः युक्तमिति भासते चेत् श्वः आरभ्य एव भवितुमर्हति।'

'तथैवास्तु।'

नीरवायां सभायां पुनः उत्साहस्य सञ्चारः अभवत्।

परेद्यवि जनसमूहः द्विगुणितः जातः। ग्रामस्य सर्वाः स्त्रियः समवेताः। मण्डनस्तु



उपस्थितः नासीत्। मण्डनस्य आसने अधुना तत्पत्नी उपविष्टवती अस्ति; यथापूर्वं शङ्करः स्वस्यासने उपाविशत्।

भारती अपृच्छत् : 'आरब्धुं शक्यं वा?'

हसन् शङ्करः अवदत् – 'अद्य मण्डनवर्यः अध्यक्षः भवेत् खलु!'

'यतिवर्य, अध्यक्षस्य आवश्यकता नास्ति। स्वपक्षमण्डनं प्रतिज्ञा च नापेक्ष्यते। मम सर्वेषां प्रश्नानाम् उत्तरं दीयते चेत् पर्याप्तम्। तदा भवता आवां द्वावपि जितौ इव!'

'पृच्छतु भवती।'

प्रश्नानां वृष्टिः व्याकरणेन आरब्धा। प्रश्नानां मितिः नास्ति। द्वित्रेषु दिनेषु व्याकरण-परीक्षा समाप्ता! अनन्तरम् आरब्धं छन्दश्शास्त्रम्। अनन्तरं निरुक्तम्, अनन्तरं ज्यौतिषम्। इयं महाविदुषी इति विचारः जनैः केवलं कर्णाकर्णिकया श्रुतः आसीत्, अस्याः पाण्डित्यं ते साक्षात् न दृष्टवन्तः आसन्, अधुना ज्ञातम्। 'इयं सरस्वत्याः अवतारः' इति अवदन् जनाः। बहूनि दिनानि अतीतानि चेदपि तस्याः प्रश्नाः न समाप्ताः। 'अये! अयं सर्वज्ञः इव भासते खलु! भवतु' इति अलङ्कारशास्त्रे प्रश्नान् आरभत, तत्रापि नवरसानां विचारे। सायङ्काले जायमाने सति देव्याः आग्रहः अपि अधिकः जातः। अन्ते कामशास्त्रे प्रश्नम् अपृच्छत्। शङ्करः कर्णौ पिधाय दीनतया 'अम्ब, अहं संन्यासी इति स्मरणे भवतु। मम तस्य शास्त्रस्य परिचयः नास्ति।'

'वादार्थम् अङ्गीकृतवान् भवान्, आदावेव न कानपि निर्बन्धान् अकरोत्। उत्तरं दातुं न शक्यं चेत् मण्डनवर्येण कृता प्रतिज्ञा कार्यगता न भवति। भवान् गन्तुमर्हति' इत्युक्त्वा अनन्तरम् एकमपि वचनम् अनुक्त्वा कुटिलीकृतानना गतवती एव।

सभायां विद्यमानाः दिग्भ्रान्ताः अभवन्। 'किमपि वा वदतु, अम्बया एवं प्रश्नकरणं न समीचीनम्' इत्यवदत् एकः, 'अम्बायाः चातुर्यं पश्यन्तु' इत्यवदत् अपरः। 'स्त्रीणाम् आग्रहः जायते चेत् ताः किं कर्तुमपि न जुगुप्सन्ते' इत्यवदत् एकः पुरुषः। 'हन्त, हन्त' इत्यवदन् बहवः। शङ्करः सद्यः एव गृहीत्वा पञ्जरे स्थापितः व्याघ्रः इव कुत्रचित् पश्यन् इतस्ततः अटितवान्। पद्मपादः दिङ्मूढः इव बहिः गत्वा उपाविशत्। पृथ्वीधरः, सः अग्रे किं करोति वा इति शङ्करमेव एकदृष्ट्या पश्यन् आसीत्। बहवः निमेषाः इत्थमेव अतीताः। अन्ते 'पृथ्वीधरवर्य, अम्बाम् आह्वयतु' इत्यवदत् शङ्करः। अन्तः गत्वा सूचिते सति उभयभारती बहिः आगतवती। शङ्करः अवदत् – 'अम्ब, मह्यम् मासात्मकं समयं ददातु। भवत्याः प्रश्नस्य उत्तरं

MahaParivrajaka

दास्यामि।'

'तथैव भवतु।'

'पृथ्वीधरवर्य, पद्मपादवर्य, आगच्छताम्, गच्छाम' इति ताभ्यां सह शङ्करः बहिः गतवान्।

अन्तः विद्यमानेन मण्डनेन शिष्याणां द्वारा विलम्बेन वार्ता ज्ञाता।

'भारति, किमिदं कृतवती!' इत्युक्ते सति सा अवदत्; 'सः बालः भवन्तम् आकृष्य नयति चेत् मया तत् दृष्ट्वा तूष्णीम् उपवेष्टव्यं किम्? एकमासात्मकं समयं पृष्ट्वा गतवान् खलु, आगते सति पश्याम।'

द्वाभ्यां शिष्याभ्यां सह शङ्करः गच्छन् अस्ति। ताभ्यां गुरवः अग्रे किं करिष्यन्ति इति ऊहितुम् अपि असाध्यम्। तयोः शरीरे प्रज्ञा अस्तीत्येव न अभासत। परस्परं भाषणं नास्ति। मार्गे प्राप्ते मन्दिरे वा वृक्षस्य अधः वा स्वल्पकालं यावत् उपवेशनं, पुनः अग्रे गमनम् इतीदं विहाय अन्यः कोऽपि व्यवहारः नास्ति। ते कुत्र गच्छन्तः सन्तीति तैरेव न ज्ञायते। भिक्षा नास्ति। द्वित्राणि दिनानि एवमेव अतीतानि। कस्मिंश्चित् गिरिशिखरे गच्छन्तः सन्ति। शङ्करः झगिति स्थितः – 'पद्मपादवर्य, सः कः शब्दः? शृणोतु' इत्यवदत्। शिष्यौ द्वावपि अवधानेन श्रुतवन्तौ।

'आम्, आम्। कश्चन रोदनशब्दः। बहवः जनाः सन्तीति भासते।'

'अहमत्र उपविष्टः भवामि। विचार्य आगच्छताम्।'

पृथ्वीधरः अवदत् : 'पद्मपादवर्य, भवान् दृष्ट्वा आगच्छतु। अहमत्रैव गुरूणां निकटे भवामि।'

गत्वा प्रत्यागतः पद्मपादः अवदत्; 'अमरुकः इति राजा परिवारसमेतः मृगयार्थम् आगतः। मृगयां समाप्य प्रतिनिवर्तनसमये तस्य शिरोभ्रमणम् अभवत्, सः अपतत् । परीक्षायां कृतायां सत्यां प्राणाः एव गताः आसन्। परिवारे २५-३० जनाः सन्ति। सर्वेऽपि रुदन्तः सन्ति।'

शङ्करः अपृच्छत् : 'राज्ञः वयः किम्?'

'प्रायः पञ्चचत्वारिंशद्वर्षाणि।'

'मरणं प्राप्तवतः तस्य कियान् कालः गतः?'

'प्रायः होरात्मकः।'

शङ्करः द्वित्रान् निमेषान् यावत् गाढालोचनायां निमग्नः अभवत्। गिरिप्रदेशं पश्यन्, 'उपरि कुत्रचित् एकान्तस्थलम् अस्ति वा इति दृष्ट्वा आगच्छताम्।



जलस्य सौकर्यमपि अस्ति वा इति पश्यताम्। शीघ्रं गत्वा आगच्छताम्' इत्यवदत्।

दृष्ट्वा आगत्य अवदताम् – 'समीचीना एका गुहा अस्ति। पार्श्वे एका निर्झरिणी प्रवहति। वासार्थं योग्या अस्ति।'

अनुक्षणं त्रयः अपि आरोहणं कृत्वा तत्र गतवन्तः। शङ्करः स्थलं परीक्ष्य गम्भीरेण ध्वनिना अपृच्छत्,

'भवतोः कृते एकं महत् दायित्वं ददामि, स्वीकुरुतः वा?'

'गुरुवर्याः, भवन्तः यथा वदन्ति तथा कुर्वः।'

'अहमधुना तस्य राज्ञः शरीरं प्रविशामि। कतिपयदिनानामनन्तरं प्रत्यागमिष्यामि। तावत्पर्यन्तम् अस्य देहस्य रक्षणं भवतोः दायित्वम्। भवतु वा?'

उभावपि शिष्यौ मूढौ इव स्थितवन्तौ। पद्मपादः 'अये!' इत्यवदत्।

'अये इत्युक्ते किम्? इदं शक्यं वा इति भवतः प्रश्नः किम्?'

'शक्यमिति जानामि। मत्स्येन्द्रनाथः इदं कार्यं कृतवान्।'

'तर्हि किम्?'

'परं नूतने शरीरे व्यामोहं प्राप्य सः तस्मिन् एव अतिष्ठत्। तं प्रत्यानेतुं शिष्येण गोरखनाथेन बहुधा श्रमः करणीयः अभवत्।'

'तथा किमपि भवति चेत्, तदेव कार्यं कर्तुं भवन्तौ स्तः खलु?'

'गुरुवर्याः क्षाम्यन्तु। तस्मिन् समये अत्र भवतां शरीरस्य कापि विपत् भवति चेत्?'

'तत् दायित्वं भवतोः मास्तु। तत् अहमेव अवधास्यामि।'

'गुरुवर्याः, अयं प्रश्नः असाधुः इति चेत् क्षाम्यन्तु। संन्यासिनः परकायप्रवेशः पापं न वा?'

'तत्र संसारनिर्वहणकर्ता गृहस्थः? उत संन्यासी?'

'गृहस्थश्चेदपि मनः संन्यासिनः एव खलु?'

'स्वप्नकाले शरीरात् भिन्ने जाते सति जीवस्य पुण्यं पापं वा अस्ति वा? बृहदारण्यकमन्त्रः भवतोः स्मरणे अस्ति न वा?'[१]

'एतावत् साहसं किमर्थं करणीयम्?'

---

१. बृहदारण्यकोपनिषत् ४.३.१५

२. तत्तादृशात्युज्ज्वलकीर्तिराशिः समस्तशास्त्रार्णवपारदर्शी। आसादितो धर्महितः प्रयत्नात्।

– माधवीये शङ्करविजये १३.१०

Mahapariwrajaka